Bodleian Libraries
UNIVERSITY OF OXFORD

This book is part of the collection held by the Bodleian Libraries
and scanned by Google, Inc. for the Google Books Library Project.

For more information see:

http://www.bodleian.ox.ac.uk/dbooks

This work is licensed under a Creative Commons Attribution-NonCommercial-ShareAlike 2.0 UK: England & Wales (CC BY-NC-SA 2.0) licence.

SANSK. 3.
53.

Sansk. F. 17. 3.53

# Mâlavikâ et Agnimitra.

# MALAVIKA ET AGNIMITRA

## DRAMA INDICUM

## KALIDASAE ADSCRIPTUM.

BIBLIOTHECA BODLEIANA

TEXTUM PRIMUS EDIDIT,
IN LATINUM CONVERTIT, VARIETATEM SCRIPTURAE ET
ANNOTATIONES ADIECIT

**OTTO FRIDERICUS TULLBERG,**

PH. DR. IN AULA AUGUST. SUEC. ET NORV. REGIS V. D. MIN.
LITT. HEBR ET ARAM. DOCENS IN UNIV. UPSALIENSI, SOCIETATI ASIAT.
PARIS. ADSCRIPTUS.

**Bonnae ad Rhenum.**

H. B. KOENIG.

MDCCCXL.

Impressit Francisc. Baaden
typis propriis Sanscritis.

# PRAEFATIO.

Anno MDCCCXXXVII Londini Anglorum aliquantum temporis commoratus, atque in libris Sanscritis legendis et excerpendis acriter deditus, hoc quoque per totum terrarum orbem iam celebratissimi Kalidasae drama, cuius argumentum a Wilsone olim exhibitum valde me delectaverat, describere coepi. In patriam vero redire mox coactus apographum perficere non potui. Postquam autem singulari munificentia atque liberalitate Serenissimi Cancellarii academiarum Scandinavicarum, Principis **JOSEPHI FRANCISCI OSCARIS**, Viri de omni litterarum genere longe meritissimi, subsidia nactus sum, quibus possem, quod diu exoptaveram, persequi, constitui Bonnam, Musarum Indicarum sedem principalem, adire, studiisque ibi peractis, Londinum revisere, ut, quod olim inchoaveram, ad finem perducerem. Bonnam autem posse visitare eam ob caussam summopere gavisus sum, quia

spes erat, fore, ut institutione Viri illustris fruerer, qui, quum primus fundamenta litterarum Indicarum, nunc tam laete florentium, in hac Universitate iecerit, etiamnum pergit eas iuvenili prorsus ardore fovere et promovere. Nec spes me fefellit. SCHLEGELIUS enim, licet multis iisdemque gravissimis laboribus occupatus, haud dedignatus est scholis suis Indicis memet adsciscere. Quo beneficio quantum promotus sim, mente probe sentio, verbis autem exprimere non possum.

Ad castra itaque Bonnensia advectus, repperi, integrum istius dramatis exemplar, a Viro Cl. BROCKHAUSIO descriptum collatumque, in manibus esse LASSENI, qui vix rogatus id mecum liberalissime communicavit. Quam opportunitatem magna laetitia arripiens editionem huius dramatis adornare decrevi. Qua mea opera si ullo modo cognitio rerum Indicarum augebitur, primaria eius rei laus BROCKHAUSIO erit attribuenda.

Codices, ad quorum fidem textus praecipue est constitutus, hi sunt:

A. Codex Devanagaricus, recens, mendosus, in primis pagellis tantummodo adhibitus.

B. Cod. Devanag. (Samvat. 1754) omnino bonus. Verba Sanscrita et Pracrita lineolis rubris inter se seiuncta sunt, passimque adiecta est vocabulorum, plerumque faciliorum, explicatio, nonnumquam enotata etiam est scripturae discrepantia.

C. Codex Devanag. antiquus, satis bene castigatus. Desunt in fine aliquot folia.

D. Cod. Bengalicus ex libris COLEBROOKII, in solo actu primo collatus.

In textu exhibendo hoc consilium secutus sum, ut

litterarum notas, ab Indica scriptura alienas, quantum possem, devitarem. Itaque, si penuria formarum typographicarum aliud non postularet, Viramam ibi tantum posui, ubi coniunctio vocabulorum omnino desineret. Confer, quae hac de re docte disseruit Boehtlingkius ad Pan. I. IV. 109, 110. Eamque rationem praeoccupavit V. Cl. Stenzlerus, Professor Vratislaviensis, praedicandus mihi etiam propterea, quod aditum ad Indorum litteras dramaticas mihi aperuit. Is enim in praestantissimis carminum, quae inscribuntur Raghuvansa et Kumarasambhava, editionibus suis, idem illud, quod me amplexum esse professus sum, consilium persecutus est.

De aetate huius dramatis multum sane disputari potest. Sunt quidem, ut ait Wilso *), multae rationes, ob quas Malavikam Sakuntalamque fabulas ab eodem profectas esse poëta credamus: plures fortasse, quam ipse concedere vult Vir Cl. Cum autem certi quid de hac re constituere non ausim, satius sit, hanc quaestionem hoc loco silentio omnino praetermittere.

De argumento huius fabulae et ratione, qua id tractavit poëta, quum nihil novi, quod addam, in promtu habeam, ad libros Wilsonis: Select specimens of the Theatre of the Hindus, T. II. p. 345 seqq. et Wishnupurana, p. 471. lectores ablegare praestat.

Interpretationem Latinam nunc adiicere non potui, perbreve enim heic morandi tempus mihi est concessum. Praeterea hanc, quum adminiculum commentarii locorumque Pracritorum explicatio omnino desint, haud nimis festinanter esse faciendam, quisque facile intelliget, is

*) Hindu Theatre II. 346 seqq.

praesertim, qui experientia talis operis difficultatem edoctus fuerit.

His dictis celare nolo, quantum debeam Tibi, Lassene, Vir plurimum colende! Doctrinae Tuae ingeniique laudes, iam diu omnibus notissimas, non est quod in hoc *opusculo* commemorem. Magnopere autem laudanda a me est singularis Tua benevolentia, qua Tu, licet gravibus negotiis distentus, quotidieque ab indigenis et peregrinis, Te consultum adeuntibus, veluti obsessus, summam opem in iis, in quibus haesi, enodandis praebuisti. In hac Tua me liberalissime excipiendi ratione *Popularem* agnoscere liceat: popularem Te vocare gloriantur nostrates. Te enim in sua terra nato gaudet Scandinavia, neque omnes Tuas laudes concedit Germaniae; aliquam certe harum partem sibi vindicare studet. Ad me vero quod attinet, si hacce opella litteras Indicas civibus meis commendatas et probatas redere ullo modo contigerit: id quod mihi maxime in votis est: Tibi, Vir Celeberrime! maxime debeo.

Tu etiam, per plures iam annos mihi carissime, Boehtlingki, qui momentis laboris, ne dicam doloris, me semper confirmasti, omnem operam dedisti, ut meam in hoc loco commorationem iucundam bonaeque frugis plenam mihi redderes. Innumera Tuae amicitiae specimina pio laetoque animo usque ad finem vitae recolam.

*Dabam Bonnae ad Rhenum mense Septembri MDCCCXL.*

# Conspectus metrorum *).

---

## I. Çlocus epicus:

⏓ ⏓ ⏓ ⏓ | *v* - - ⏒ ‖ ⏓ ⏓ ⏓ ⏓ | *v* - *v* ⏓ |
⏓ ⏓ ⏓ ⏓ | *v* - - ⏒ ‖ ⏓ ⏓ ⏓ ⏓ | *v* - *v* ⏓ |

Vid. dist. **13. 14. 18. 28. 30. 62. 64. 70. 72. 84. 86–88. 90. 91. 93.**

## II. Metra monoschematica.

A. ubi hemistichia aequalia sunt.

1. Indravagra: ⏓ - *v* - - *v v* - *v* - - |
   Vid. dist. **2. 15. 16. 45. 50. 66. 89. 92.**
2. Çâlinî: - - - - - *v* - - *v* - - |
   Vid. dist. **49. 56. 83.**
3. Drutavilambita: *v v v* - *v v* - *v v* - *v* - |
   Vid. dist. **41. 71. 82.**
4. Praharshiṅî: - - - *v v v v* - *v* - *v* - - |
   Vid. dist. **20.**
5. Rukirâ: *v* - *v* - *v v v v* - *v* - *v* - |
   Vid. dist. **74.**
6. Vasantatilaka: - - *v* - *v v v* - *v v* - *v* - - |
   Vid. dist. **11. 67. 78. 85. 95.**
7. Mâlinî: *v v v v v v* - - ‖ - *v* - - *v* - - |
   Vid. dist. **26. 47.**

---

*) Cfr. Schlegelii et Lasseni Hitopadesam, T. II. p. 197 seqq. et Lasseni Anthologiam Sanscriticam, p. 103 seqq.

8. Çikhariṅî: v - - - - - || v v v v v - - v v v - |
Vid. dist. 36.

9. Pṛithvî: v - v v v - v - || v v v - v - - v - |
Vid. dist. 52.

10. Hariṅî: v v v v v - || - - - - || v - v v - v - |
Vid. dist. 69. 76. 77.

11. Mandakrânta: - - - - || v v v v v - || - v - - v - - |
Vid. dist. 27. 29. 39. 59.

12. Çârdûlavikrîdita: - - - v v - v - v v v - || - - v - - v - |
Vid. dist. 4. 24. 40. 73.

13. Sragdharâ: - - - - v - - || v v v v v v - || - v - - v - - |
Vid. dist. 1. 33.

B. Ubi hemistichia inaequalia sunt.

1. Vaitâlija: hem. 1. 3. v v - v v - v - v - |
2. 4. v v - - v v - v - v - |
Vid. dist. 37.

2. Aupak̄handasika: hem. 1. 3. v v - v v - v - v - - |
2. 4. v v - - v v - v - v - - |
Vid. dist. 38. 46.

3. Aparavaktra: hem. 1. 3 v v v v v v - v - v - |
2. 4. v v v v - v v - v - v - |
Vid. dist. 55.

4. Pushpitâgra : hem. 1. 3. v v v v v v - v - v - - |
2. 4. v v v v - v v - v - v - - |
Vid. dist. 10.

## III. Metra polyschematica.

1. A'rjâ:

<table>
<tr><td colspan="4">Hem. 1.</td><td colspan="4">Hem. 2.</td></tr>
<tr><td>- -</td><td>- -</td><td>- -</td><td>|| - -</td><td>- -</td><td>v - v</td><td>- -</td><td>- |</td></tr>
<tr><td>v v -</td><td>v v -</td><td>v v -</td><td>|| v v -</td><td>v v -</td><td>v v v v</td><td>v v -</td><td></td></tr>
<tr><td>- v v</td><td>- v v</td><td>- v v</td><td>|| - v v</td><td>- v v</td><td></td><td>- v v</td><td></td></tr>
<tr><td>v v v v</td><td>v v v v</td><td>v v v v</td><td>|| v v v v</td><td></td><td></td><td></td><td></td></tr>
<tr><td></td><td>v - v</td><td></td><td>|| v - v</td><td></td><td></td><td></td><td></td></tr>
</table>

| | Hem. 3. | | | Hem. 4. | | |
|---|---|---|---|---|---|---|
| - - | - - | - - | ‖ - - | - - | v | - - -\| |
| v v - | v v - | v v - | ‖ v v - | v v - | | v v - |
| - v v | - v v | - v v | ‖ - v v | | | - v v |
| v v v v | v v v v | | ‖ v v v v | | | |
| | v - v | | ‖ v - v | | | |

Vid. dist. **3. 5-9. 12. 17. 19. 21-23. 31. 32. 34. 35. 42-44. 48. 51. 53. 54. 57. 58. 60. 61. 63. 65. 75. 79-81. 94.**

**2.** A'rjâgîti:

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| - v v | v v v v | v v - | ‖ - - | v v - | v - v | v v v v | - -\| |
| v v v v | - - | v v v v | ‖ v - v | - - | v | - - - | \| |

Vid. dist. **68.**

**3.** Metrum Prâcritum, quadripartitum, **88 (22 × 4)** moras syllabicas continens, cuius nomen ignoro. Pars prior cuiusque hemistichii e quinque longis et duabus brevibus, ordine inaequali; posterior e sex brevibus et duabus longis syllabis, ordine aequali, constare videtur. Caesura post momentum syllabicum duodecimum locum habet. Schema hoc est:

- v - v - - -
- - v - v - -
- - - v v - -
- v - v - - -
} v v v v v v - - |

Vid. dist. **25.**

अथ

श्रीकालिदासविरचितं मालविकाग्निमित्रं

नाम नाटकं

एकैश्वर्यस्थितो ऽपि प्रणतबहुफलो यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहो ऽप्यविषयमनसां यः परस्ताद्यतीनां ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥ १ ॥

॥ नान्द्यन्ते सूत्रधारः ॥

सूत्रधारः ॥ नेपथ्याभिमुखमवलोक्य ॥ मारिष इतस्तावत् ।

॥ प्रविश्य पारिपार्श्विकः ॥

पारिपार्श्विकः । भाव अयमस्मि ।

सूत्रधारः । अभिहितो ऽस्मि परिषदा श्रीकालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकमस्मिन्नववसन्तोत्सवे प्रयोक्तव्यमिति । तदारभ्यतां संगीतकं ।

पारिपार्श्विकः । मा तावत् । प्रथितयशसां धावकसौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य कृतौ किं कृतो बहुमानः ।

सूत्रधारः । अयि विवेकविश्रान्तमभिहितं । पश्य

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यं ।
सन्तः परीक्ष्यान्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥ २॥

पारिपार्श्विकः । आर्यमिश्राः प्रमाणं ।

सूत्रधारः । तेन हि त्वरतां भवान् ।

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुं ।
देव्या इव धारिण्याः सेवादक्षः परिजनो ऽयं ॥ ३ ॥

॥ इति निष्क्रान्तौ ॥

॥ प्रस्तावना ॥

॥ ततः प्रविशति चेटी ॥

चेटी । आणत्तम्हि देवीए धारिणीए अचिरप्पउत्तोबदेसअं छलिअं णाम णट्टअं अन्तरेण कीरिसी मालविएत्ति णट्टाआरिअं अज्जगणदासं पुच्छिदुं । ता जाव संगीदसालं गच्छम्हि ॥ इति परिक्रामति ॥

॥ ततः प्रविशत्याभरणहस्ता द्वितीया चेटी ॥

प्रथमा ॥ द्वितीयां दृष्ट्वा ॥ हला कोमुदीए कुदो दे इअं धीरदा जं समीएबि अदिक्कमन्ती इदो दिट्ठिं ण देसि ।

द्वितीया । अम्मो बउलावलिआ । सहि देवीए इदं सिप्पि सआसादो आणीदं णागमुद्दासणाहं अङ्गुलीअअं सिणिद्धं णिज्झाअन्ती तुह उबालम्भे पडिदम्हि ।

प्रथमा ॥ विलोक्य ॥ ठाणे सज्जदि दे दिट्ठी । इमिणा अङ्गुलीअएण उब्भिण्णकिरणकेसरेण कुसुमिदो विअ दे अग्गहत्थो ।

द्वितीया । हला कहिं पत्थिदासि ।

प्रथमा । देवीए वअणेण णट्टाआरिअं अज्जगणदासं पुच्छिदुं उबदेसग्गहणे कीरिसी मालविएत्ति ।

द्वितीया । सहि ईरिसेण वावारेण असण्णिहिदाबि सा भट्टिणा कहं दिट्ठा ।

प्रथमा । ग्रां । सो जणो देवीए पासगदो चित्ते दिट्ठो ।

द्वितीया । कहं विग्र ।

प्रथमा । सुणाहि । चित्तसालं गदा देवी जदा पच्चग्गवण्णराग्रं चित्तलेहं ग्राग्रारिग्रस्स पुलग्रन्ती चिट्ठदि । तहिं ग्रन्तरे भट्टा उबट्ठिदो ।

द्वितीया । तदो तदो ।

प्रथमा । उबग्राराणन्तरं एक्कासणोबविट्ठेण भट्टिणा चित्तगदाए देवीए परिग्रणमज्झगदं ग्रासण्णपरिग्रारिग्रं पेक्खिग्र देवी पुच्छिदा ।

द्वितीया । किति ।

प्रथमा । ग्रपुव्वा इग्रं दारिग्रा देवीए ग्रासण्णा लिहिदा किं णामहेएत्ति ।

द्वितीया । ग्राकिदिविसेसे ग्राग्ररो पदं करेदि । तदो ।

प्रथमा । तदो ग्रवहीरिग्रवग्रणो भट्टा सङ्किदो देविं पुणोबि ग्रणुबन्धिदुं पउत्तो । तदो कुमारीए वसुलच्छीए ग्राग्रक्खिदं । ग्रज्ज एसा मालविएत्ति ।

द्वितीया ॥ सस्मितं ॥ सरिसं खु एदं बालभाग्रस्स । तदो ग्रबरं कहेहि ।

प्रथमा । किं ग्रण्णं । संपदं मालविग्रा सविसेसं भट्टिणो दंसण पहादो रक्खीग्रदि ।

द्वितीया । हला ग्रणुचिट्ठ ग्रत्तणो णिग्रोग्रं । ग्रहंपि एदं ग्रङ्गुलीग्रग्रं देवीए उबणइस्सं । ॥ इति निष्क्रान्ता ॥

प्रथमा ॥ परिक्रम्यावलोक्य च ॥ एसो णट्टाग्रारिग्रो संगीदसालादो णिग्गच्छदि । दाव से ग्रत्ताणं दंसेमि ॥ इति परिक्रामति ॥

॥ प्रविश्य गणदासः ॥

गणदासः । कामं खलु सर्वस्यापि कुलविद्या बहुमता न पुनरस्माकं नाट्यं प्रति मिथ्या गौरवं । कुतः । तथा हि

देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनं ॥ ४ ॥

बकुलावलिका ॥ उपेत्य ॥ अज्ज वन्दामि ।

गणदासः । भद्रे चिरं जीव ।

बकुलावलिका । अज्जं देवी पुच्छदि । अवि उवदेसग्गहणे ण अदिकिलिस्सेदि वो सिस्सा मालविएत्ति ।

गणदासः । भद्रे विज्ञाप्यतां देवी परमनिपुणा मेधाविनी चेति । किं बहुना ।

यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्तद्विशेषकरणात्प्रत्युपदिशतीव मे बाला ॥ ५ ॥

बकुलावलिका ॥ आत्मगतं ॥ अदिक्कमन्तिं विअ इरावदिं पेक्खामि ॥ प्रकाशं ॥ किदत्था दाणिं वो सिस्सा जस्सिं गुरुअणो एव्वं तुस्सदि ।

गणदासः । भद्रे तद्विधानामसुलभत्वात्पृच्छामि । कुतो देव्या तत्पात्रमानीतं ।

बकुलावलिका । अत्थि देवीए वण्णावरो भादा वीरसेणो णाम । सो भट्टिणा अन्तबालदुग्गे णम्मदातीरे ठाविदो । तेण सिप्पाहिआरे जोग्गा इअं दारिएत्ति बहिणीए देवीए उवआणं पेसिदा ।

गणदासः ॥ स्वगतं ॥ आकृतिविशेषप्रत्ययादेनामनूनवस्तुकां संभावयामि ॥ प्रकाशं ॥ भद्रे मयापि यशस्विना भवितव्यं । यतः

पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥ ६ ॥

बकुलावलिका । अज्ज कहिं दाणिं वो सिस्सा ।

गणदासः । इदानीमेव पञ्चाङ्गादिकमभिनयमुपदिश्य मया विश्रम्य तामित्यभिहिता दीर्घिकावलोकनगवाक्षगता प्रवातमासेवमाना तिष्ठति ।

बकुलावलिका । तेण हि अणुजाणादु मं अज्जो । जाव से अज्जपरितोसणिवेदणेण उस्साहं वड्ढेमि ।

गणदासः । दृश्यतां सखी । अहमपि लब्धक्षणः स्वगेहं गच्छामि ।

॥ इति निष्क्रान्तौ ॥

## ॥ मिश्रविष्कम्भकः ॥

---

॥ ततः प्रविशत्येकान्तस्थितपरिजनो मन्त्रिणा लेखहस्तेनान्वास्यमानो राजा ॥

राजा ॥ अनुवाचितलेखममात्यं विलोक्य ॥ वाहतक किं प्रतिपद्यते वैदर्भः ।

अमात्यः । देव आत्मविनाशं ।

राजा । निर्देशमिदानीं ज्ञातुमिच्छामि ।

अमात्यः । इदमिदानीमनेन प्रतिलिखितं । पूज्येनाहमादिष्टः । पितृव्यपुत्रो भवतः कुमारो माधवसेनः प्रतिश्रुतसंबन्धो ममोपान्तिकमुपसर्पन्नन्तरा त्वदीयेनान्तपालेनावस्कन्द्य गृहीतः । स त्वया मदपेक्षया

सकलत्रसोदर्यो मोचयितव्य इति । तत्र वो न विदितं यत्तुल्याभिजनेषु भूमिधरेषु राज्ञां वृत्तिः । अतो ऽत्र मध्यस्थः पूज्यो भवितुमर्हति । सोदरी पुनरस्य ग्रहणविप्लवे विनष्टा । तदन्वेषणाय यतिष्ये । अथ वा । अवश्यमेव माधवसेनो मया पूज्येन मोचयितव्यः । श्रूयतामभिसंधिः ।

आर्य सचिवं मुञ्चति यदि पूज्यः संयतं मम श्यालं ।
मोक्ता माधवसेनं ततो ऽहमपि बन्धनात्सद्यः ॥७॥

राजा ॥ सरोषं ॥ कथं कार्यविनिमयेन मयि व्याहरत्यनात्मज्ञः । वाहतक प्रकृत्यमित्रः प्रतिकूलकारी च मे वैदर्भः । तद्यातव्यपक्षे स्थितस्य पूर्वसंकल्पितमुन्मूलनाय वीरसेनप्रमुखं दण्डचक्रमाज्ञापय ।

अमात्यः । यदाज्ञापयति देवः ।

राजा । अथ वा किं भवान्मन्यते ।

अमात्यः । शास्त्रदृष्टमाह देवः ।

अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात् ।
नवसंरोपणशिथिलस्तरुरिव सुकरः समुद्धर्तुं ॥८॥

राजा । तेन ह्यवितथं तन्त्रकारवचनं । इदमेव निमित्तमादाय समुद्योज्यतां सेनापतिः ।

अमात्यः । तथा ॥ इति निष्क्रान्तः ॥

॥ परिजनो यथाव्यापारं राजानमभितः स्थितः । प्रविश्य विदूषकः ॥

विदूषकः । आणत्तोम्हि तत्तभवदा रण्णा । गोदम चिन्तेहि दाव उवाअं जह मे जदिच्छादिट्ठपडिकिदी मालविआ पच्चक्खदंसणा होदि त्ति । मए अ तं तह किदं दाव से णिवेदेमि ॥ इति परिक्रामति ॥

राजा ॥ विदूषकं दृष्ट्वा ॥ अयमपरः कार्यान्तरसचिवो ऽस्मानुपस्थितः ।

विदूषकः ॥ उपगम्य ॥ वड्ढदु भवं ।

राजा ॥ सशिरःकम्पं ॥ इत आस्यतां ।

॥ विदूषक उपविष्टः ॥

राजा । कच्चिदुपायोपेयदर्शने व्यापृतं ते प्रज्ञाचक्षुः ।

विदूषकः । पओअसिद्धिं पुच्छ ।

राजा । कथमिव ।

विदूषकः ॥ कर्णे ॥ एव्वं विअ ॥ इत्यावेदयति ॥

राजा । साधु वयस्य निपुणमुपक्रान्तमिदानीं । दुरधिगमसिद्धावप्यस्मिन्नारम्भे वयमाशंसामहे । कुतः

सप्रतिबन्धं कार्यं प्रभुरधिगन्तुं सहायवानेव ।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि ॥ ९ ॥

॥ नेपथ्ये ॥ अलमलं बहु विकथ्य । राज्ञः समक्षमेवावयोरधरोत्तरयोर्व्यक्तिर्भविष्यति ।

राजा ॥ आकर्ण्य ॥ सखे वत्सुनीतिपादपस्य पुष्पमुद्भिन्नमिदं ।

विदूषकः । फलंपि देक्खिस्ससि ।

॥ ततः प्रविशति कञ्चुकी ॥

कञ्चुकी । देव अमात्यो विज्ञापयति । अनुष्ठिता प्रभोराज्ञेति । एतौ पुनर्हरदत्तगणदासावुभावभिनयाचार्यौ परस्परजयैषिणौ त्वां द्रष्टुमुद्यतौ साक्षाद्भावाविव शरीरिणौ ।

राजा । प्रवेशय तौ ।

कञ्चुकी । यदाज्ञापयति देवः ।

॥ इति निष्क्रम्य ताभ्यां सह प्रविष्टः ॥

कञ्चुकी । इत इतो भवन्तौ ।

गणदासः ॥ राजानं विलोक्य ॥ अहो दुरासदो राजमहिमा ।

न च न परिचितो न चाप्यरम्य
श्चकितमुपैमि तथापि पार्श्वमस्य ।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवो ऽयमक्ष्णोः ॥ १० ॥

हरदत्तः । महत्खलु पुरुषाकारमिदं ज्योतिः । तथा हि

द्वारे नियुक्तपुरुषानुमतप्रवेशः
सिंहासनान्तिकचरेण सहोपसर्पन् ।
तेजोभिरस्य विनिवर्तितदृष्टिपातै
र्वाक्यादृते पुनरिव प्रतिवारितो ऽस्मि ॥ ११ ॥

कञ्चुकी । एष देवः । उपसर्पेतां भवन्तौ ।

उभौ ॥ उपेत्य ॥ विजयतां देवः ।

राजा । स्वागतं भवद्भ्यां ॥ परिजनं विलोक्य ॥ आसने तावदत्रभवतोः ।

॥ उभौ परिजनोपनीतयोरासनयोरुपविष्टौ ॥

राजा । किमिदं शिष्योपदेशकाले युगपदाचार्याभ्यामत्रोपस्थानं ।

गणदासः । देव श्रूयतां । मया सुतीर्थादभिनयविद्या सुशिक्षिता । दत्तप्रयोगश्चास्मि देवेन देव्या च परिगृहीतः ।

राजा । दृढं जाने । ततः किं ।

गणदासः । सो ऽहममुना हरदत्तेन प्रधानपुरुषसमक्षमयं न मे पादरजसापि तुल्य इत्यधिक्षिप्तः ।

हरदत्तः । देव अयमेव प्रथमं परिवादकरः । अत्रभवतः किल मम च समुद्रपल्वलयोरिवान्तरमिति । तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु । देव एव नौ विशेषज्ञः प्राश्निकः ।

विदूषकः । समत्थं पडिसादं ।

गणदासः । प्रथमः कल्पः । अवहितो देवः श्रोतुमर्हति ।

राजा । तिष्ठ तावत् । पक्षपातमत्र देवी मन्यते । तदस्याः पण्डितकौशिकीसहितायाः समक्षमेव न्याय्यो व्यवहारः ।

विदूषकः । सुट्ठु भवं भणादि ।

आचार्यौ । यद्देवाय रोचते ।

राजा । मौद्गल्य अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धमाहूयतां देवी ।

कञ्चुकी । यदाज्ञापयति देवः ।

॥ इति निष्क्रम्य सपरिव्राजिकया देव्या सह प्रविष्टः ॥

कञ्चुकी । इत इतो भवती ।

धारिणी ॥ परिव्राजिकां विलोक्य ॥ भअवदि हरदत्तस्स गणदासस्स अ संरम्भं कहं पेक्खसि ।

परिव्राजिका । अलं स्वपक्षावसादशङ्कया । न परिहीयते प्रतिवादिना गणदासः ।

धारिणी । जइबि एव्वं तहबि राअपरिग्गहो से पहुत्तणं उबहरदि ।

परिव्राजिका । अयि राज्ञीशब्दभाजनमात्मानमपि चिन्तयतु भवती । पश्य

अतिमात्रभासुरत्वं पुष्यति भानुः परिग्रहादङ्कः ।
अधिगच्छति महिमानं चन्द्रोऽपि निशा परिगृहीतः ॥ १२॥

विदूषकः । अबिहा अबिहा । उबट्ठिदा देवी पीठमद्दिअं पण्डिदकोसिइं पुरोकरिअ तत्तभोदी धारिणी ।

राजा । पश्याम्येनां यैषा

मङ्गलालंकृता भाति कौशिक्या यतिवेषया ।
त्रयी विग्रहवत्येव सममध्यात्मविद्यया ॥ १३ ॥

परिव्राजिका ॥ उपेत्य ॥ विजयतां देवः ।

राजा । भगवति अभिवादये ।

परिव्राजिका ।

महासारप्रसवयोः सदृशक्षमयोर्द्वयोः ।
धारिणीभूतधारिण्योर्भव भर्ता शरच्छतं ॥ १४ ॥

धारिणी । जेदु जेदु अज्जउत्तो ।

राजा । स्वागतं देव्यै ॥ परिव्राजिकां विलोक्य ॥ भगवति क्रियतामासनपरिग्रहः ।

॥ सर्व उपविशन्ति ॥

राजा । भगवति अत्रभवतोर्हरदत्तगणदासयोः परस्परं विज्ञानसंघर्षिणोर्भगवत्या प्राश्निकपदमध्यासितव्यं ।

परिव्राजिका ॥ सस्मितं ॥ अलमुपालम्भेन । पत्तने सति ग्रामे रत्नपरीक्षा ।

राजा । नैतदेवं । पण्डितकौशिकी खलु भगवती । पक्षपातिनावहं देवी च ।

आचार्यौ । सम्यगाह देवः । मध्यस्था भगवती नौ गुणदोषतः परिच्छेत्तुमर्हति ।

राजा । तेन हि प्रस्तूयतां विवादः ।

परिव्राजिका । देव प्रयोगप्रधानं हि नाट्यशास्त्रं । किमत्र वाग्व्यवहारेण । कथं वा देवी मन्यते ।

देवी । जइ मं पुच्छसि तदा एदाणं विवादो एव्व ण मे रुच्चदि ।

गणदासः । देवि न मां समानविद्यतया परिभवनमवगमयितु मर्हसि ।

विदूषकः । भो देक्खामो उअरंभरिसंवादं । किं मुधा वेदणादाणेण एदाणं ।

देवी । णं कलहप्पिओसि ।

विदूषकः । मा एव्वं चण्डि । अण्णोण्णकलहप्पिआणं मत्तहत्थिणं एक्कदरस्सिं अणिज्जिदे कुदो उवसमो ।

राजा । ननु स्वाङ्गसौष्ठवातिशयमुभयोर्दृष्टवती भगवती ।

परिव्राजिका । अथ किं ।

राजा । तदिदानीमतः परं किमाभ्यां प्रत्याययितव्यं ।

परिव्राजिका । तदेव वक्तुकामास्मि ।

श्लिष्टा क्रिया कस्यचिदात्मसंस्था
संक्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव ॥ १५ ॥

विदूषकः । सुदं अज्जेहिं भअवदीए वअणं । एस पिण्डितत्थो उवदेसदंसणादो णिण्णओत्ति ।

हरदत्तः । परमभिमतं नः ।

गणदासः । देवि एवं स्थितं ।

देवी । जदा उण मन्दमेधा सिस्सा उवदेसं मलिणेदि । तदा आआरिअस्स दोसो ।

राजा । देवि एवमापद्यते । विनेतुरद्रव्यपरिग्रहो ऽपि बुद्धिला

घवं प्रकाशयति ।

देवी ॥ जनान्तिकं ॥ कहं दाणिं ॥ प्रकाशं । गणदासं विलोक्य ॥ अलं अज्ज उत्तस्स उस्साहकारणं मणोरहं परिपूरिअ । विरम णिरत्थादो आरम्भादो ।

विदूषकः । सुट्ठु भोदी भणादि । भो गणदास संगीदअपदोब लम्भिअसरस्सईउबाअणमोदआइं खादमाणस्स किं दे सुलहणिग्गहेण विवादेण ।

गणदासः । सत्यमयमेवार्थो देवीवाक्यस्य । श्रूयतामवसरप्राप्तमिदानीं ।

> लब्धास्पदो ऽस्मीति विवादभीरो
> स्तितिक्षमाणस्य परेण निन्दां ।
> यस्यागमः केवलजीविकायै
> तं ज्ञानपण्यं बणिजं वदन्ति ॥ १६ ॥

देवी । अइरोबणीदा दे सिस्सा । अपरिणिट्ठिदस्स उबदेसस्स उण अणज्जं आवेदणं ।

गणदासः । अत एव मे निर्बन्धः ।

देवी । तेण हि दुवेबि भअवदीए उबदेसं दंसेह ।

परिव्राजिका । देवि नैतन्न्याय्यं । सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय ।

देवी ॥ जनान्तिकं ॥ मूढे परिव्वाजिए मं जग्गन्तिंपि सुत्तं विअ करेसि ॥ इति सासूयं परावर्तते ॥

॥ राजा देवीं परिव्राजिकायै दर्शयति ॥

परिव्राजिका ।

अनिमित्तमिन्दुवदने किमत्रभवतः पराङ्मुखी भवसि ।
प्रभवन्त्यो ऽपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः ॥ १७ ॥

विदूषकः । णं सकारणं एव्व । अत्तणो पक्खो रक्खिदव्वो ॥ गणदासं विलोक्य ॥ णं दिट्ठिआ कोबव्वाजेण देवीए परित्तादो भवं । सुसिक्खिदोबि सव्वो उबदेसदंसणेण णिल्हादो होदि ।

गणदासः । देवि श्रूयतां । एवं जनो गृह्णाति । तदिदानीं
विवादे दर्शयिष्यामि क्रियासंक्रान्तिमात्मनः ।
यदि मां नानुजानासि परित्यक्तो ऽस्म्यहं त्वया ॥ १८ ॥

॥ आसनादुत्थातुमिच्छति ॥

देवी । का गई । पभवदि आग्रारिअग्रो सिस्सजणास्स ।

गणदासः । चिरमपदेशशङ्कितो ऽस्मि ॥ राजानमवलोक्य ॥ अनुज्ञातं देव्या तदाज्ञापयतु देवः । कस्मिन्नभिनयवस्तुन्युपदेशं दर्शयिष्यामि ।

राजा । यदादिशति भगवती ।

परिव्राजिका । किमपि देव्या मनसि वर्तते ततः शङ्कितास्मि ।

देवी । भण वीसद्धं । पभविस्सदि पभू अत्तणो परिअणस्स ।

राजा । मम चेति ब्रूहि ।

देवी । भअवदि भण दाणिं ।

परिव्राजिका । देव शर्मिष्ठायाः कृतिः । चतुष्पदोत्थं छलिकमुदाहरन्ति । तत्रैकार्थसंश्रयमुभयोः प्रयोगं पश्यामः । तावता ज्ञायत एवात्रभवतोरुपदेशान्तरं ।

आचार्यौ । यदाज्ञापयति भगवती ।

विदूषकः । तेण हि दुवेबि वग्गापेक्खागेहे संगीदरअणं करिअ अत्तभवदो दूदं पेसध । अह वा मुदङ्गसद्दोज्जेव्व णो उट्ठाबइस्सदि ।

हरदत्तः । तथा ॥ इत्युत्तिष्ठति ॥

॥ गणदासो धारिणीमवलोकयति ॥

देवी ॥ गणदासं विलोक्य ॥ जयी भोदु अज्जो । णं विजअप्पच्चत्थिणी अहं अज्जस्स ।

॥ आचार्यौ प्रस्थितौ ॥

परिव्राजिका । इतस्तावत् ।

आचार्यौ ॥ परिवृत्य ॥ इमौ स्वः ।

परिव्राजिका । निर्णयाधिकारे ब्रवीमि । सर्वाङ्गसौष्ठवाभिव्यक्तये विगतनेपथ्ययोः पात्रयोः प्रवेशो ऽस्तु ।

उभौ । नेदमावयोरुपदेश्यं ॥ इति निष्क्रान्तौ ॥

देवी ॥ राजानमवलोक्य ॥ जइ राअकज्जेसुवि ईरिसी णिउणदा अज्जउत्तस्स तदो सोहणं भोदि ।

राजा ।

अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदं ।
प्रायः समानविद्याः परस्परयशःपुरोभागाः ॥ १९ ॥

॥ नेपथ्ये मृदङ्गध्वनिः ॥

॥ सर्वे कर्णं ददति ॥

परिव्राजिका । हन्त प्रवृत्तं संगीतकं । तथा ह्येषा

जीमूतस्तनितविशङ्किभिर्मयूरै
रुद्ग्रीवैरनुगमितस्य पुष्करस्य ।
निर्ह्रादिन्युपहितमध्यमस्वरोत्था
मायूरी मदयति मार्जना मनांसि ॥ २० ॥

राजा । देवि तस्याः सामाजिका भवामः ।

देवी ॥ स्वगतं ॥ अहो अविणओ अज्जउत्तस्स ।

॥ सर्व उत्तिष्ठन्ति ॥

विदूषकः ॥ अपवार्य ॥ भो धीरं गच्छ । तत्तभोदी धारिणी विसं वादइस्सदि ।

राजा ।

धैर्यावलम्बिनमपि त्वरयति मां मुरजवाद्यरावो ऽयं।
अवतरतः सिद्धिपथं शब्दः स्वमनोरथस्येव ॥ २१ ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति प्रथमो ऽङ्कः ॥

॥ ततः प्रविशति संगीतरचनायां कृतायामासनस्थः सवयस्यो राजा धारिणी परिव्राजिका विभवतश्च परिवारः ॥

राजा । भगवति अत्रभवतोराचार्ययोः कतरस्य प्रथममुपदेशो दृश्यतां ।

परिव्राजिका । ननु समाने ऽपि ज्ञानभावे वयोऽधिकत्वाद्गणदासः पुरस्कारमर्हति ।

राजा । तेन हि मौद्गल्य एवमत्रभवतोरावेद्य नियोगमशून्यं कुरु ।

कञ्चुकी । यदाज्ञापयति देवः ॥ इति निष्क्रान्तः ॥

॥ प्रविश्य गणदासः ॥

गणदासः । देव शर्मिष्ठायाः कृतिर्लयमध्या चतुष्पदा । तस्याश्च चतुष्पदवस्तुकं प्रयोगमेकमना देवः श्रोतुमर्हति ।

राजा । आचार्यबहुमानादवहितो ऽस्मि ।

॥ निष्क्रान्तो गणदासः ॥

राजा ॥ जनान्तिकं ॥ वयस्य

नेपथ्यगृहगतायाश्चक्षुर्दर्शनसमुत्सुकं तस्याः ।
संहर्तुमधीरतया व्यवसितमिव मे तिरस्करिणीं ॥ २२ ॥

विदूषकः ॥ अपवार्य ॥ उबट्ठिदं णअणमहु समिहिदं अक्खिअं च । ता अप्पमत्तो दाणिं पेक्ख ।

॥ ततः प्रविशत्याचार्यप्रत्यवेक्ष्यमाणाङ्गसौष्ठवा मालविका ॥

विदूषकः । पेक्खदु भवं । ण खु से पडिच्छन्दादोबि हीअदि मङ्गरदा ।

राजा ॥ अपवार्य ॥ वयस्य

चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयं ।
संप्रति शिथिलसमाधिं मन्ये येनेयमालिखिता ॥ २३ ॥

गणदासः । वत्से मुक्तसाधसा सवस्था भव ।

राजा ॥ स्वगतं ॥ अहो सर्वास्ववस्थास्वनवद्यता रूपस्य । तथा हि

दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः ॥ २४ ॥

मालविका ॥ उपगानं कृत्वा चतुष्पदवस्तुकं गायति ॥

दुल्लहो पिओ तस्सिं भव हिअअ णिरासं
अम्मो अपङ्गओ मे फुरइ किंपि वामओ ।
एसो सो चिरदिट्ठो कहं उबणइदव्वो
णाह मं पराहीणं तुइ गणअ सतण्हं ॥ २५ ॥

॥ ततो यथारसमभिनयति ॥

विदूषकः ॥ अपवार्य ॥ भो वअस्स चडुप्पदअत्थुअं डुवारीकरिअ तुइ उबट्ठाबिदो विअ अप्पा अत्तभोदीए ।

राजा । सखे एवमावयोर्हृदयं । अनया खलु

जनमिममनुरक्तं विद्धि नाथेति गेये
वचनमभिनयन्त्या स्वाङ्गनिर्देशपूर्वं ।
प्रणयगतिमदृष्ट्वा धारिणीसंनिकर्षा
दहमिव सुकुमारप्रार्थनाव्याजमुक्तः ॥ २६ ॥

॥ मालविका गीतान्ते निष्क्रान्तुमारब्धा ॥

विदूषकः । भोदि चिट्ठ । किंपि वो विसुमरिदो कम्मभेदो । तं दाव पुच्छिस्सं ।

गणदासः । वत्से क्षणमात्रं स्थित्वोपदेशविशुद्धा यास्यसि ।

॥ मालविका स्थिता ॥

राजा ॥ स्वगतं ॥ अहो सर्वास्ववस्थासु चारुता शोभान्तरं पुष्यति । तथा हि

वामं संधिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयं ।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्यादस्याः स्थितमतितरां कान्तमृज्वायतार्धं ॥ २७ ॥

देवी । णं गोदमवअणंपि अज्जो हिअए करेदि ।

गणदासः । देवि मा मैवं । देवप्रत्ययात्संभाव्यते सूक्ष्मदर्शिता गौतमस्य । पश्य

मन्दो ऽप्यमन्दतामेति संसर्गेण विपश्चितः ।
पङ्कच्छिदः फलस्येव निकर्षेणाविलं पयः ॥ २८ ॥

॥ विदूषकं विलोक्य ॥ तच्छृणुमो विवक्षितमार्यस्य ।

विदूषकः ॥ गणदासं विलोक्य ॥ कोसिइं दाव पुच्छ । पच्छा जो मए कम्मभेदो दिट्ठो तं भणिस्सं ।

गणदासः । भगवति यथादृष्टमभिधीयतां गुणो वा दोषो वेति ।

परिव्राजिका । यथादर्शितं सर्वमनवद्यं । कुतः ।

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमुपगतस्तन्मयत्वं रसेषु ।
शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं नुदति विषयाद्रागबन्धः स एव ॥ २९ ॥

गणदासः । देवः कथं मन्यते ।

राजा । वयं स्वपक्षशिथिलाभिमानाः संवृत्ताः ।

गणदासः । अद्य नर्तयितास्मि ।

उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः ।
श्यामायते न युष्मासु यः काञ्चनमिवाग्निषु ॥ ३० ॥

देवी । दिट्ठिआ परिक्खाराहणेण अज्जो वड्ढइ ।

गणदासः । त्वत्परिग्रहो ऽपि मे वृद्धिहेतुः ॥ विदूषकं विलोक्य ॥ गौतम वदेदानीं यत्ते मनसि वर्तते ।

विदूषकः । पढमोवदेसदंसणे पढमं बम्हणपूजा कादव्वा । सा णं वो विसुमरिदा ।

परिव्राजिका । अहो प्रयोगाभ्यन्तरः प्रश्नः ।

॥ सर्वे हसिताः । मालविकापि स्मितं करोति ॥

राजा ॥ स्वगतं ॥ उपात्तसारश्चक्षुषा स्वविषयः । यदनेन

स्मयमानमायताक्ष्याः किंचिदभिव्यक्तदशनशोभि मुखं ।
असमग्रलक्ष्यकेशरमुच्छ्वसदिव पङ्कजं दृष्टं ॥ ३१ ॥

गणदासः । महाब्राह्मण न खलु नेपथ्यसवनमिदं । अन्यथा कथं त्वां दक्षिणीयं नार्चयिष्यामः ।

विदूषकः । मए णाम सुक्खघणगज्जिदे अन्तरिक्खे जलपाणेण चादआइदं ।

परिव्राजिका । एवमेव ।

विदूषकः । तेण हि पण्डिदपरितोसप्पच्चआ णं मूढा जादी । जदि अत्तभोदीए शोहणं भणिदं तदो इमं से पारितोसिअं पअच्छामि ॥ राज्ञो हस्तात्कटकमाकर्षति ॥

देवी । चिट्ठ गुणन्तरं अजाणन्तो किं णिमित्तं तुमं आहरणं देसि ।

विदूषकः । परकेरंत्ति करिअ ।

देवी ॥ आचार्यं विलोक्य ॥ अज्ज गणदास णं दंसिदोबदेसा दे सिस्सा ।

गणदासः । वत्से एहि गच्छाव इदानीं ।

॥ सहाचार्येण निष्क्रान्ता मालविका ॥

विदूषकः ॥ जनान्तिकं ॥ एत्तिओ मे मदिविहवो भवन्तं सेविदुं ।

राजा । अलमलं परिच्छेदेन । अहं हि

भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव ।
द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करिणीं ॥ ३२ ॥

विदूषकः ॥ जनान्तिकं ॥ साधु दरिद्दातुरो विअ वेज्जेण ओसहं उप्पादीअमाणं इच्छसि ।

॥ प्रविश्य हरदत्तः ॥

हरदत्तः । देव मदीयमिदानीं प्रयोगमवलोकयितुं प्रसादः क्रियतां ।

राजा ॥ स्वगतं ॥ अवसितो मे दर्शनार्थः ॥ दाक्षिण्यमवलम्ब्य प्रकाशं ॥ ननु पर्युत्सुका एव वयं ।

हरदत्तः । अनुगृहीतो ऽस्मि ।

॥ नेपथ्ये ॥ जयतु जयतु देवः । उपारूढो मध्याह्नः । तथा हि

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां
सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि ।
बिन्दूत्क्षेपान्पिपासुः परिसरति शिखी भ्रान्तिमद्वारियन्त्रं
सर्वैरुस्रैः समग्रस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः ॥ ३३ ॥

विदूषकः । अविहा । अम्हाणं भोअणवेला । अत्तभवदो उइदवेलादिक्कमेण चिकिस्सआ दोसं उदाहरन्ति । हरदत्त किं भणासि ।

हरदत्तः । अस्ति चान्यस्य वचनावकाशो ऽत्र ।

राजा ॥ हरदत्तमवलोक्य ॥ तेन हि त्वदीयमुपदेशं श्वो द्रक्ष्यामः । विरम्यतां भवान् ।

हरदत्तः । यदाज्ञापयति देवः ॥ इति निष्क्रान्तः ॥

देवी । णिव्वत्तेदु अज्जउत्तो मज्जणविहिं ।

विदूषकः । भोदी विसेसेण पाणभोअणं तुअराबेदु ।

परिव्राजिका ॥ उत्थाय ॥ स्वस्ति भवते ॥ इति देव्या सह निष्क्रान्ता ॥

विदूषकः । भो ण केवलं रूबे सिप्पेबि अदुदीआ मालविआ ।

राजा । वयस्य

अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता ।
उपकल्पितो विधात्रा बाणः कामस्य विषदिग्धः ॥ ३४ ॥

किं बहुना । चिन्तयितव्यो ऽस्मि ते ।

विदूषकः । भवदाबि अहं । दिठ्ठं विपणिकन्दू विअ मे हिअअब्भन्तरं डज्झदि ।

राजा । एवमेव । भवानस्मदर्थे वर्ततां ।

विदूषकः । गिह्वीददक्खिणोम्हि । किं तु मेह्वावलीरुद्धज्जोण्ह्वा विग्र पराह्वीणदंसणा तत्तभोदी मालविग्रा । भवंपि सूणापरिचरो विग्र गिद्धो ग्रामिसलोलुबो भीरुग्रो ग्र । ग्रचत्ताउरो विग्र कज्ज सिद्धिं पत्थन्तो मे रोग्रसि ।

राजा । कथमनातुरो भविष्यामि । यदा

सर्वान्तःपुरवनिताव्यापारं प्रति निवृत्तहृदयस्य ।
सा वामलोचना मे स्नेहस्यैकायनीभूता ॥ ३५ ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति द्वितीयो ऽङ्कः ॥

॥ ततः प्रविशति परिव्राजिकायाः परिचारिका ॥

समाहितिका । आणत्तम्हि भअवदीए । समाहिदिए देवस्स उबवणात्थं वीजपूरअं गेण्हिअ आअच्छेत्ति । तं दाव पमदवणपालिअं मडुअरिअं अण्णेसामि ॥ परिक्रम्यावलोक्य च ॥ एसा तबणीआसोअं ओलोअन्ती मडुअरिआ चिट्ठदि । जाव णं संभावेमि ।

॥ ततः प्रविशत्युद्यानपालिका ॥

समाहितिका ॥ उपसृत्य ॥ आलि सुहो दे उज्जाणवणव्वाबारो ।

मधुकरिका । अम्मो समाहिदिआ । सहि साअदं दे ।

समाहितिका । हला भअवदी आणबेदि । अरित्तपाणिणा अम्हारिसजणेण अत्तभवं देविखदव्वो । ता वीजपूरएण सुस्सूसइदुं इच्छामित्ति ।

मधुकरिका । णं सण्णिहिदं वीजपूरअं । कहेहि अण्णोण्णसंघस्सिदाणं णट्टाआरिआणं उबदेसं देक्खिअ कदरो भअवदीए पसंसिदो ।

समाहितिका । दुवेबि किल आगमिणो पओअणिउणा अ । किं दु सिस्सागुणविसेसेण उण्णमिदो गणदासो ।

मधुकरिका । अह मालविआगअं कोलीणं किं सुणीअदि ।

समाहितिका । वाढं किल तस्सिं साहिलासो भट्टा । केवलं

देवीए धारिणीए चित्तं रक्खन्तो अत्तणो पङ्कत्तणं ण दंसेदि । मालविआवि इमेसु दिअहेसु अणुण्हदामुत्ता विअ मालदीमाला मिलाअमाणा लक्खीअदि । अदो अवरं ण जाणे । विसज्जेहि मं ।

मधुकरिका । एदं साहावलम्बि बीजपूरअं गेण्ह ।

समाहितिका ॥ नाट्येन गृहीत्वा ॥ हला तुमंबि इदो पेसलतरं साहुजणसुस्सूसाए फलं पाएहि ॥ इति प्रस्थिता ॥

मधुकरिका । सहि समं गच्छम्ह । अहंबि इमस्स चिराअमाणकुसुमोग्गमस्स तबणीआसोअस्स दोहलणिमित्तं देवीए णिवेदेमि ।

समाहितिका । जुज्जदि अहिआरो खु तुह ।

॥ इति निष्क्रान्ते ॥

## ॥ प्रवेशकः ॥

---

॥ ततः प्रविशति कामयमानावस्थो राजा विदूषकश्च ॥

राजा ॥ आत्मानं विलोक्य ॥

शरीरं मन्दं स्यादसति दयितालिङ्गनसुखे
भवित्सास्रं चक्षुः क्षणमपि न सा दृश्यत इति ।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय परितापं व्रजसि किं ॥ ३६ ॥

विदूषकः । अलं भवदो धीरदं उज्झिअ परिदेविदेण । दिट्ठा मए

मालविआए पिअसही बउलावलिआ सुणाबिदा अ अत्थं जो भव दा संदिट्ठो ।

राजा । ततः किमुक्तवती ।

विदूषकः । विण्णबेहि भट्टारअं । अणुगिहीदम्हि इमिणा णिओ एण । किं तु सा तबस्सिणी देवीए अहिअअरं रक्खीअमाणा अरक्खि दाणं विअ णिहीणं सुहं समासादइदव्वा । तहबि जतिस्संत्ति ।

राजा । भगवन्संकल्पयोने प्रतिबन्धवत्सु विषयेष्वभिनिवेश्य तथा प्रहरिष्यसि यथा जनो ऽयं न कालान्तरक्षमो भविष्यति ॥ सविस्मयं ॥

क्व रुजा हृदयप्रमाथिनी
क्व च ते विश्वसनीयमायुधं ।
मृदुतीक्ष्णतरं यदुच्यते
तदिदं मन्मथ दृश्यते त्वयि ॥ ३७ ॥

विदूषकः । णं भणामि तस्सिं साहणिज्जे कज्जे किदो मए उबाओत्ति । ता पज्जवत्थाबेदु अत्तभवं अत्ताणअं ।

राजा । अथेमं दिवसशेषं व्यापारविमुखेन चेतसा क्व नु यापया मि ।

विदूषकः । अज्ज एव्व पढमावदारसुहआणि रत्तकुरवआणि उबा अणं पेसिअ णववसन्तावदारव्वबदेसेण इरावदीए णिउणिआमुहेण आचक्खिदो । इच्छेमि अज्जउत्तेण सह दोलाधिरोहणं अणुभविदुं त्ति । भवदाबि संपडिण्णादं । ता पमदवणं एव्व गच्छम्ह ।

राजा । न क्षममिदं ।

विदूषकः । कहं विअ ।

राजा । वयस्य निसर्गनिपुणाः स्त्रियः । कथं मामन्यसंक्रान्तहृदय

मुपलालयन्तमपि ते सखी न लङ्घयिष्यति । अतः पश्यामि

उचितः प्रणयो वरं विहन्तुं
बहवः खण्डनहेतवो हि दृष्टाः ।
उपचारविधिर्मनस्विनीनां
न तु पूर्वाभ्यधिको ऽपि भावशून्यः ॥ ३८ ॥

विदूषकः । णारुहदि भवं अन्तेउरट्ठिदं दक्खिणं एक्कपदे पिट्ठदो काउं ।

राजा ॥ विचिन्त्य ॥ तेन हि प्रमदवनमार्गमादिशय ।

विदूषकः । इदो इदो भवं ।

॥ उभौ परिक्रामतः ॥

विदूषकः । णं एदं पमदवणं पवणबलचलाहिं पल्लवङ्गुलीहिं तुअराबेदि विअ भवन्तं पविसिदुं ।

राजा ॥ स्पर्शं रूपयित्वा ॥ अभिजातः खलु वसन्तः । सखे पश्य

उन्मत्तानां श्रवणसुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव ।
अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन ॥ ३९ ॥

विदूषकः । पविस णिव्वुदिलाहाअ ।

॥ उभौ प्रविशतः ॥

विदूषकः । अवधाणेण दिट्ठिं देहि । एदं खु भवन्तं विअ लोहइदुकामाए पमदवणलच्छीए जुवदीवेसलज्जावपित्तिअं कुसुमणेवत्थं गहिदं ।

राजा । ननु विस्मयादवलोकयामि ।

रक्ताशोकलताविशेषितगुणो बिम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणं ।
आक्रान्ता तिलकक्रियापि तिलकैर्लग्नद्विरेफाञ्जनैः
सावज्ञेव मुखप्रसादनविधौ श्रीर्माधवी योषितां ॥ ४० ॥

॥ इत्युद्यानशोभां निरूपयतः ॥

॥ प्रविष्टा पर्युत्सुका मालविका ॥

मालविका । अविण्णादहिअअं भट्टारअं अहिलसन्ती अत्तणोवि दाव लज्जेमि । कुदो विहवो सिणिद्धस्स सहीअणस्स वुत्तन्तं आचक्खिदुं । ण आणे अप्पडिआरगरुअं वेदणं कित्तिअं कालं मदणो मं णइस्सदित्ति ॥ कतिचित्पदानि गत्वा ॥ कहिं णु पत्थिदम्हि ॥ विचिन्त्य ॥ आ संदिट्ठम्हि देवीए । गोदमचावलादो दोलापरिब्भट्ठाए सरुजो मम चलणा । ण सक्कुणोमि । तुमं दाव तवणीआसोअस्स दोहलं णिवट्टेहित्ति । जइ सो पञ्चरत्तब्भन्तरे कुसुमं दंसेदि तदो तुह ॥ इत्यन्तरा निःश्वस्य ॥ अहिलासपूरइत्तअं पसादं दाबइस्संत्ति । जाव णिओअभूमिं पढमं गदा होमि । दाव अणुपदं मम चलणालंकारहत्थाए बउलावलिआए आअन्तव्वं । ता परिदेविस्सं दाव विस्सद्धं मुहुत्तअं ॥ इति परिक्रामति ॥

विदूषकः ॥ दृष्ट्वा ॥ ही ही एदं खु सीधुपाणुव्वेजिअस्स मच्छण्डिआ उवणदा ।

राजा । अये किमेतत् ।

विदूषकः । एसा णादिपरिक्खिदवेसा उस्सुअवअणा एआइणी मालविआ अदूरे वट्टदि ।

राजा ॥ सहर्षं ॥ कथं मालविका ।

विदूषकः । अहइं ।

राजा । शक्यमिदानीं जीवितमवलम्बयितुं ।

त्वदुपलभ्य समीपगतां प्रियां
हृदयमुच्छ्वसितं मम जीवितुं ।
तरुवृतां पथिकस्य जलार्थिनः
सरितमारसितादिव सारसात् ॥ ४१ ॥

क्व तत्रभवती ।

विदूषकः । एसा तरुराइमज्झादो णिक्कन्ता इदोज्जेव परिवट्टन्ती दीसदि ।

राजा । पश्याम्येनां ।

विपुलं नितम्बदेशे मध्ये क्षामं समुन्नतं कुचयोः ।
अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥ ४२ ॥

सखे पूर्वस्मादवस्थान्तरमुपपन्ना तत्रभवती । तथा हि

शरकाण्डपाण्डुगण्डस्थलेयमाभाति परिमिताभरणा ।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता ॥ ४३ ॥

विदूषकः । एसाबि भवं विअ मअणवाहिणा परिमिट्ठा भविस्सदि ।

राजा । सौहार्दमेवं पश्यति ।

मालविका । असोओ ललिदसुउमारदोहलापेक्खी अगिहीदकुसुमणेबत्थो उक्कण्ठिदाए मम सोअं अणुकरेदि । जाव से पच्छाअसीअले सिलापट्टए णिसण्णा अत्ताणं विणोदेमि ।

विदूषकः । सुदं भवदा उक्कण्ठिदम्हित्ति अत्तभोदी मन्तेदि ।

राजा । नैतावता भवन्तं प्रसन्नतर्कं मन्ये । कुतः ।

वोढा कुरवकरजसां किसलयपुटभेदशीकरानुगतः ।
अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः ॥ ४४ ॥

॥ मालविकोपविष्टा ॥

राजा । सखे इतस्तावदावां लतान्तरितौ भवावः ।

विदूषकः । इरावदिं विअ अदूरे पेक्खामि ।

राजा । न हि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतङ्गजः ॥ इति विलोकयन्स्थितः ॥

मालविका । हिअअ णिरवलम्बणादो अदिभूमिलङ्घिणो मणोरहादो विरम । किं मं आआसिअ ।

॥ विदूषको राजानं वीक्षते ॥

राजा । पश्य महत्त्वं स्नेहस्य ।

औत्सुक्यहेतुं विवृणोषि न त्वं
तत्त्वावबोधैकफलो न तर्कः ।
तथापि रम्भोरु करोमि लक्ष्य
मात्मानमेषां परिदेवितानां ॥ ४५ ॥

विदूषकः । संपदं भवदो णिस्संसअं भविस्सदि । एसा अप्पिदमअणसंदेसा विवित्ते णं बउलावलिआ उबगदा ।

राजा । अपि स्मरेदस्मदभ्यर्थनां ।

विदूषकः । किं दाणिं एसा दासीए दुहिदा दाव गरुअं संदेसं विसुमरेदि ।

॥ प्रविश्य चरणालंकारहस्ता बकुलावलिका ॥

बकुलावलिका । अबि सुहं सहीए ।

मालविका । अम्मो बउलावलिआ उबट्ठिदा । सागदं दे । उबविस ।

बकुलावलिका ॥ उपविश्य ॥ हला तुमं दाणिं जोग्गदाए णिउत्ता । एक्कं दे चलणं उवणेहि जाव सालत्तअं सणेउरं करेमि ।

मालविका ॥ स्वगतं ॥ हिअअ अलं सुहिदाए । उवट्ठिदो अअं विहवो । कहं दाणिं अत्ताणं मोचेअं । अह वा एदं एव्व मे मित्तमण्डणं भविस्सदि ।

बकुलावलिका । किं विआरेसि । उस्सुआ खु इमस्स तवणी आसोअस्स कुसुमोग्गमे देवी ।

राजा । कथमशोकदोहलनिमित्तो ऽयमारम्भः ।

विदूषकः । किं खु ण आणासि । अकारणादो देवी इमं अन्तेउरणेवत्थेण जोजइस्सदित्ति ।

मालविका ॥ पादमुपहरति ॥ हला मरिसेहि दाणिं ।

बकुलावलिका । अइ सरीरंसि मे ॥ नाट्येन चरणसंस्कारमारभते ॥

राजा ।

चरणान्तनिवेशितां प्रियायाः
सरसां पश्य वयस्य रागलेखां ।
प्रथमामिव पल्लवप्रसूतिं
हरदग्धस्य मनोरथद्रुमस्य ॥ ४६ ॥

विदूषकः । चलणाणुरूवो तत्तभोदीए अहिआरो उवक्खित्तो ।

राजा । सम्यग्भवानाह ।

नवकिसलयरागेणाग्रपादेन बाला
स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन ।
अकुसुमितमशोकं दोहलापेक्षया वा
प्रणमितशिरसं वा कान्तमार्द्रापराधं ॥ ४७ ॥

विदूषकः । पारइस्ससि तत्तभोदीए अबरद्धुं ।

राजा । प्रतिगृह्णीतं वचः सिद्धिदर्शिनो ब्राह्मणस्य ।

॥ ततः प्रविशति युक्तमदेरावती चेटी च ॥

इरावती । हञ्जे णिउणिए सुणामि बहुसो मदो किल इत्थिआअणस्स विसेसमण्डणंत्ति । अबि सच्चो लोअवादो अअं ।

निपुणिका । पढमं लोअवादो एव्व सच्चसच्चो संवुत्तो ।

इरावती । सच्चित्तिसंसिणा सिणेहेण अलं । कहेहि कुदो दाणिं अवगमिदं दोलाघरं पढमागदो भट्टा ण वेत्ति ।

निपुणिका । भट्टिणीए अखण्डिदादो पणआदो ।

इरावती । अलं सेवाए । मस्सपदं गदुअ भणाहि ।

निपुणिका । णं वसन्तस्स वडवाअणलोलुबेण अज्जगोदमेण कहिदं । तुअरदु भट्टिणी ।

इरावती ॥ अवस्थासदृशं परिक्रम्य ॥ हञ्जे मदेण गिलाअमाणं अत्ताणं अज्जउत्तस्स दंसणे हिअअं तुअराबेदि चलणा उण मग्गे ओलग्गन्ति ।

निपुणिका । णं संपत्तम्ह दोलाघरअं ।

इरावती । णिउणिए अज्जउत्तो एत्थ ण दीसदि ।

निपुणिका । णं भट्टिणी ओलोएदु । परिहासणिमित्तं कहिंपि गूढेण भट्टिणा होदव्वं । अम्हेबि इमं पिअङ्गुलदापरिक्खित्तं असोअसिलापट्टअं पविसामो ।

इरावती । तह ।

निपुणिका ॥ विहस्य ॥ ओलोअदु भट्टिणी चूदङ्कुरं विणमन्तीणं अम्हाणं पिपीलिआहिं दंसिदं ।

इरावती । किं विश्र एदं ।

निपुणिका । एसा असोअपादवच्छाआए मालविआए बउलावलिआ चलणालंकारं णिवत्तेदि ।

इरावती ॥ शङ्कां रूपयित्वा ॥ अभूमी इअं मालविआए । कहं एत्थ तक्केसि ।

निपुणिका । तक्केमि दोलापरिब्भंसिदरुजचलणाए देवीए असोअदोहलाधिआरे मालविआ णिउत्तेत्ति । अण्णहा कहं देवी सअं धारिदं एदं णेउरजुअलं परिअणस्स अब्भणुजाणिस्सदि ।

इरावती । महदी मे संभावणा ।

निपुणिका । किं ण अण्णेसीअदि भट्टा ।

इरावती । हला मे चलणा अग्गदो ण पवडन्ति । मदो मं विआरेदि । आसङ्किदस्स दाव अन्तं गमिस्सं ।

मालविका ॥ निरूप्यात्मगतं ॥ ठाणे खु कादरं मे हिअअं ।

बकुलावलिका ॥ चरणं दर्शयति ॥ किंबि रोअदि दे राअरेहाविण्णासो ।

मालविका । अत्तणो चलणंत्ति लज्जेमि णं पसंसिदुं । केण सिप्पसाहणकलाए एव्वं अभिणीदासि ।

बकुलावलिका । एत्थ खु भट्टिणो सिस्सम्हि ।

विदूषकः । तुवरेहि दाणिं गुरुदक्खिणाए ।

मालविका । दिट्ठिआ ण गव्विदासि ।

बकुलावलिका । उबदेसाणुरूबे चलणे लम्भिअ दाणिं गव्विदा भविस्सं ॥ राजं विलोक्यात्मगतं ॥ हन्त सिद्धो मे दप्पो ॥ प्रकाशं ॥ सहि एक्कस्स दे चलणस्स अवसिदो राअणिक्खेबो । केवलं मुहमारुदो

लम्भइदव्वो । अह्व वा पवादं एव्व एदं ठाणं ।

राजा । सखे पश्य पश्य ।

आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन शोषयतः ।
प्रतिपन्नः प्रथमतरः संप्रति सेवावकाशो मे ॥ ४८ ॥

विदूषकः । कुदो दे अणुसओ । एदं भवदा चिरक्कमेण अणुभविदव्वं ।

बकुलावलिका । सहि अरुणं सदपत्तं विअ सोह्नदि दे चलणं । सव्वह्ना भट्टिणो अङ्कपरिवट्टिणी होहि ।

॥ इरावती निपुणिकामवेक्षते ॥

राजा । ममेयमाशीः ।

मालविका । हला मा अविणीअं मन्तेहि ।

बकुलावलिका । मन्तिदव्वं एव्व मए मन्तिदं ।

मालविका । पिआ खु अहं तव ।

बकुलावलिका । ण केवलं मम ।

मालविका । कस्स वा अण्णस्स ।

बकुलावलिका । गुणेसु अहिणिवेसिणो भट्टिणोबि ।

मालविका । अलिअं मन्तेसि । एदं एव्व मइ णत्थि ।

बकुलावलिका । सव्वं तुइ णत्थि । भट्टिणो किसेसु सुन्दरपण्डुरेसु दीसइ अङ्गेसु ।

निपुणिका । पढमं गुणिदं विअ हदासाए उत्तरं ।

बकुलावलिका । अणुराओ अणुराएण परिक्खिदव्वोत्ति सुअण वअणं पमाणं करेहि ।

मालविका । किं अत्तणो छन्देण मन्तेसि ।

बकुलावलिका । ण हि ण हि । भट्टिणो खु एदाणि पण अमिउआणि अक्खराणि विप्पप्पेरिदाणि ।

मालविका । हला देविं चिन्तिअ ण मे हिअअं विस्ससदि ।

बकुलावलिका । मुद्धे भमरसंपादो वसन्तोदारसंभूदो दाणिं णाव चूदप्पसवो ओदंसणिज्जो ।

मालविका । तुमं जाव मे दुज्जादे ओदंसिणी होहि ।

बकुलावलिका । विमद्दसुरही बउलावलिआ खु अहं ।

राजा । साधु बकुलावलिके साधु ।

भावज्ञानानन्तरं प्रस्तुतेन
प्रत्याख्याने दत्तयुक्तोत्तरेण ।
वाक्येनेयं स्थापिता स्वे निदेशे
स्थाने प्राणाः कामिनो दूत्यधीनाः ॥ ४१ ॥

इरावती । हञ्जे पेक्ख कारिदं एव्व बउलावलिआए एदं पदं मालविआए ।

निपुणिका । भट्टिणि णिव्विआरस्स अधिआरस्स उद्दोबदेसो ।

इरावती । ठाणे खु सङ्किदं मे हिअअं । गिहीदत्था अणन्तरं चिन्तइस्सं ।

बकुलावलिका । एसोवि दे संवुत्तपरिकम्मो चलणो । जाव णं सणेउरं करेमि ॥ नाट्येन नूपुरयुगलमामुच्य ॥ हला उट्ठेहि अणुचिट्ठ देवीए असोअस्स विआसइत्तिअं णिओअं ॥ उभे उत्तिष्ठतः ॥

इरावती । सुदो देवीए णिओओत्ति । भोदु दाणिं ।

बकुलावलिका । एसो उबारूढराओ उबभोगक्खमो पुरदो दे चिट्ठदि ।

मालविका ॥ सहर्षं ॥ किं भट्टा ।

बकुलावलिका ॥ सस्मितं ॥ ण दाव भट्टा । असोअसाहावलम्बी गुच्छओ । ओदंसेहि दाव णं ।

॥ मालविका विषादं नाटयति ॥

विदूषकः । किं सुदं भवदा ।

राजा । सखे पर्याप्तमेतावता कामिनां ।

अनातुरोत्कण्ठितयोः प्रसिध्यता
समागमेनापि रतिर्न मां प्रति ।
परस्परप्राप्तिनिराशयोर्वरं
शरीरनाशो ऽपि समानरागयोः ॥ ५० ॥

॥ मालविका रचितपल्लवावतंसा सलीलमशोकाय पादं प्रहिणोति ॥

राजा । वयस्य

आदाय कर्णकिसलयमस्मादियमत्र चरणमर्पयति ।
उभयोः सदृशविनिमयादात्मानं वञ्चितं मन्ये ॥ ५१ ॥

मालविका । अबि णाम अम्हाणं संभावणा सफला हवे ।

बकुलावलिका । हला णत्थि दे दोसो । णिस्संसअं णिग्गुणो अअं असोओ जइ कुसुमुग्गममन्थरो हवे जो दे चलणसक्कारं लम्भिअ ।

राजा ।

अनेन तनुमध्यया मुखरनूपुराराविणा
नवाम्बुरुहकोमलेन चरणेन संभावितः ।
अशोक यदि सद्य एव मुकुलैर्न संपत्स्यसे
मुधा वहसि दोहलं ललितकामिसाधारणं ॥ ५२ ॥

सखे वचनावकाशपूर्वकं प्रवेष्टुमिच्छामि ।

विदूषकः । एहि णं परिहासइस्सं ।

॥ उभौ प्रवेशं कुरुतः ॥

निपुणिका । भट्टिणि भट्टिणि भट्टा एत्थ पविसदि ।

इरावती । एदं मम पढमं चिन्तिदं हिअएण ।

विदूषकः ॥ उपेत्य ॥ होदि जुत्तं णाम अत्तभोदो पिअवअस्सो असोओ वामपाएण ताडइदुं ।

उभे ॥ ससंभ्रमं ॥ अम्मो भट्टा । जेदु जेदु भट्टा ।

विदूषकः । बउलावलिए गिहीदत्थाए तुए अत्तभोदी ईरिसं अविणअं करन्ती कीस ण णिवारिदा ।

॥ मालविका भयं रूपयति ॥

निपुणिका । भट्टिणि पेक्ख किं पउत्तं अज्जगोदमेण ।

इरावती । कहं खु बम्हबन्धू अणाहा जीविस्सदि ।

बकुलावलिका । अज्ज एसा देवीए णिओओं अणुचिट्ठदि । एदस्सिं अदिक्कमे परवदी इअं । पसीदडु भट्टा ।

॥ आत्मना सहैनां प्रणिपातयति ॥

राजा । यद्येवमनपराद्धासि । उत्तिष्ठ भद्रे ॥ हस्तेन गृहीत्वोत्थापयति ॥

विदूषकः । जुज्जदि देवी एत्थ माणइदव्वा ।

राजा ॥ विहस्य ॥

किसलयमृदोर्विलासिनि कठिने निहितस्य पादपस्कन्धे ।
चरणस्य न ते बाधा संप्रति वामोरु वामस्य ॥ ५३ ॥

॥ मालविका लज्जां नाटयति ॥

इरावती । अहो णवणीदकप्पहिअओ अज्जउत्तो ।

मालविका । बउलावलिए एहि अणुचिट्ठिदं अत्तणो णिओअं देवीए णिवेदेम्ह ।

बकुलावलिका । विसबेहि भट्टारं विसज्जेहित्ति ।

राजा । भद्रे यास्यसि । मम तावदुत्पन्नावसरमर्थित्वं श्रूयतां ।

बकुलावलिका । अवहिदा सुणाह्मि । आणबेदु भट्टा ।

राजा ।

धृतपुष्पमयमपि जनो बध्नाति न तादृशं चिरात्प्रभृति ।
स्पर्शामृतेन पूरय दोहलमस्याप्यनन्यरुचेः ॥ ५४ ॥

इरावती ॥ सहसोपसृत्य ॥ पूरेहि पूरेहि । असोओ कुसुमं ण दंसेदि । अअं खु उण उत्तम्भिदो एव्व ।

॥ सर्व इरावतीं दृष्ट्वा संभ्रान्ताः ॥

राजा ॥ अपवार्य ॥ वयस्य का प्रतिपत्तिरत्र ।

विदूषकः । किं अण्णं जङ्घाबलं एव्व ।

इरावती । साहु बउलावलिए साहु उबक्कन्तं दाणिं । करेहि सफलप्पत्थणं अज्जउत्तं ।

उभे । पसीददु भट्टिणी । काओ वअं भट्टिणीं पणअपरिग्गहस्स

॥ इति निष्क्रान्ते ॥

इरावती । अविस्ससणीआ पुरिसा । अत्तणो वञ्चअवअणं पमाणीकरिअ अहिकिवित्ताए पिअघरिणीए हिअअसह्लं किदं । एव्वं ण विसादं मए वाहजणगिल्लीदचित्ताए अविसङ्किदाए हरिणीए विअ विणासोत्ति ।

विदूषकः ॥ जनान्तिकं ॥ भो पडिबज्जेहि किंपि उत्तरं । किं ण भणाइ । उदकान्दमूले विमहिले विमहिदेण कुम्भीलेण संदेसो

एक्खिदव्वोत्ति । वत्तग्घो क्खोहि ।

राजा । सुन्दरि न मे मालविकायाः कश्चिदर्थः । मया त्वं चिर यसीति यथा कथंचिदात्मा विनोदितः ।

इरावती । अविस्ससणीअअोसि । ण मए विसादं ईरिसं विणो दवुत्तन्तं अज्जउत्तेण उबलड्डत्ति । अण्णहा दुक्खव्वाबारिणी एव्वं ण करेमि ।

विदूषकः । मा दाव तत्तभोदो दक्खिणस्स उबरोहं भविदुं स मीबदिट्ठेण देवीए परिइत्थिआअणेण संकहा अहिसूइआ अबराहो खमी अदु । एत्थ तुमं एव्व पमाणं ।

इरावती । णं संकहा णाम होदु कित्ति अत्ताणं आआसइस्सं

॥ इति रुष्टा प्रस्थिता ॥

राजा ॥ अनुसरन् ॥ प्रसीदतु भवती ।

॥ इरावती रसनासंदानितचरणा व्रजत्येव ॥

राजा । सुन्दरि न शोभते प्रणयिजने निरपेक्षता ।

इरावती । सठ अविस्ससणीअोसि ।

राजा ।

शठ इति मयि तावदस्तु ते
परिचयवत्यवधीरणा प्रिये ।
चरणपतितया न चण्डि तां
विसृजसि मेखलयापि याचिता ॥ ५५ ॥

इरावती । इअंपि हदासा तुमं एव्व अणुसरदि ।

॥ रसनामादाय राजानं ताडयितुमिच्छति ॥

राजा । एषेरावती

वाष्पासारा हेमकाञ्चीगुणेन
श्रोणीबिम्बान्मव्यपेक्षांच्युतेन ।
चण्डं चण्डं हन्तुमभ्युद्यता मां
विद्युद्दाम्ना मेघराजीव विन्ध्यं ॥ ५६ ॥

इरावती । किं एव्वं भूश्रोबि मं श्रवधीरिश्रं करेदि ।

राजा ॥ सरसनं हस्तमवलम्बयति ॥

अपराधिनि मयि दण्डं संहरसि समुद्यतं कुटिलकेशि ।
वर्धयसि विलासिवं दासजनायात्र कुप्यसि च ॥ ५७ ॥

नूनमिदानीमनुज्ञातं ॥ इति पादयोः पतति ॥

इरावती । ण खु इमे मालविश्राए चलणा जे दे हरिसदोहलं पूरइस्सन्ति ॥ इति निष्क्रान्ता सचेटी ॥

विदूषकः । उट्ठेहि अकिदप्पसादोसि ।

राजा ॥ उत्थायैरावतीमपश्यन् ॥ वत कथं गतैव प्रिया ।

विदूषकः । वश्रस्स देव्वेहिं इमस्स अविणअस्स अपसारिदा । अत्तणा वअंसिग्घं अपक्कमाम जाव अङ्गारको रासिं विअ अणुचक्कं ण करेदि ।

राजा । अहो मदनवैषम्यं ।

मन्ये प्रियाहृतमनास्तस्याः प्रणिपातलङ्घनं सेवां ।
एवं प्रणयवती सा न हि शक्यमुपेक्षितुं कुपिता ॥ ५८ ॥

तदेहि कुपितां देवीं प्रसादयावः ।

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति तृतीयो ऽङ्कः ॥

॥ ततः प्रविशति पर्युत्सुको राजा प्रतीहारी च ॥

राजा ॥ आत्मगतं ॥

तामाश्रित्य श्रुतिपथगतामाशया बद्धमूलः
संप्राप्तायां नयनविषयं रूढरागप्रबालः ।
हस्तस्पर्शैः कुसुमित इव व्यक्तरोमोद्गमत्वा
त्कुर्यात्क्लान्तं मनसिजतरुर्मा रसज्ञं फलस्य ॥ ५१ ॥

॥ प्रकाशं ॥ सखे गौतम ।

प्रतीहारी । जेदु जेदु भट्टा । असण्णिहिदो गोदमो ।

राजा ॥ आत्मगतं ॥ आः । मालविकावृत्तान्तज्ञानाय प्रेषितः ।

॥ प्रविश्य विदूषकः ॥

विदूषकः । जेदु जेदु भवं ।

राजा । जयसेने जानीहि तावत् । क्व वा देवी कथं वा सरुजवाद्दिनोग्यत इति ।

पतीहारी । जं देवो आणवेदि ॥ इति निष्क्रान्ता ॥

राजा । गौतम को वृत्तान्तस्तत्रभवत्यास्ते सख्याः ।

विदूषकः । यो विडालगिहीदाए परहुदिआए ।

राजा ॥ सविषादं ॥ कथमिव ।

विदूषकः । सा खु तबस्सिणी ताए पिङ्गलक्खीए सारभण्डगे हके मुद्दे परिक्खित्ता ।

राजा । ननु मत्संपर्कमुपलभ्य ।

विदूषकः । अहइं ।

राजा । क एवं विमुखो ऽस्माकं येन चण्डीकृता देवी ।

विदूषकः । सुणादु भवं । परिव्वाजिआ मे कहेदि । भो हिओ किल तत्तभोदी इरावदी रुजाअत्तचलणं देविं सुहं पुच्छिदुं आअदा ।

राजा । ततस्ततः ।

विदूषकः । तदो सा देवीए पुच्छिदा । किं अत्तणोबि अणालं किदो हिओ जणो वछहोत्ति । तदो ताए उत्तम्मन्तीए मन्तिदं । कुदो वा उबआरो जं परिअणे संकन्तं वछहत्तणं जाणिस्सदित्ति ।

राजा । निर्भेदादृते मालविकायामयमुपन्यासः शङ्कयति ।

विदूषकः । तदो ताए अणुबन्धीअमाणाए भवदो अविणअं अन्तरेण परिगदत्था किदा ।

राजा । अहो दीर्घरोषता तत्रभवत्याः । अतः परं कथय ।

विदूषकः । किं अबरं । मालविआ बउलावलिआ अ णिगलपदीओ अदिट्ठसुज्जपाआ पाआलवासं णागकण्णआ विअ अणुहवन्ति ।

राजा । कष्टं कष्टं ।

मधुरस्वरा परभृता भ्रमरी च विबुद्धचूतसङ्गिन्यौ ।
कोटरमकालवृष्ट्या प्रबलपुरोवातया गमिते ॥ ६० ॥

अप्यत्र कस्यचिदुपक्रमस्य गतिः स्यात् ।

विदूषकः । कहं भविस्सदि । जं सारभण्डव्वाबारिदा माहविआ देवीए संदिट्ठा । मम अङ्गुलीअमुद्दअं अदेक्खिअ ण मोत्तव्वा तुए हदासा मालविआ बउलावलिआ चेत्ति ।

राजा ॥ निःश्वस्य निःपरामर्शः ॥ सखे किमत्र कर्तव्यं ।

विदूषकः । अत्थि एत्थ उबाओ ।

राजा । क इव ।

विदूषकः ॥ सदृष्टिक्षेपं ॥ कोबि अदिट्ठो सुणादि । कधे दे कहेमि ॥ उपश्लिष्य ॥ एव्वं विअ ।

राजा । अनुष्ठितं प्रयुज्यतां सिद्धये ।

॥ प्रविश्य प्रतीहारी ॥

प्रतीहारी । देव पवादसअणे देवी णिसण्णा रत्तचन्दणवारिणा परिअणहत्थगदेण चन्दणेण भअवदीए विणोदीअमाणा कहाहिं चिट्ठदि ।

राजा । तस्मादस्मत्प्रयाणायोग्यो ऽयमवसरः ।

विदूषकः । भो गच्छदु भवं । अहंपि देविं पेक्खिदुं अरित्तपाणी हुविस्सं ।

राजा । जयसेनायास्तावत्संविदितं गच्छ ।

विदूषकः । तह ॥ कर्णे ॥ एव्वं विअ होदि ॥ इति निष्क्रान्तः ॥

राजा । तेन हि प्रवातशयनमार्गमादेशय ।

प्रतीहारी । इदो इदो देवो।

॥ प्रविश्य शयनस्था देवी परिव्राजिका विभवतश्च परिवारः ॥

देवी । भअवदि रमणीआ कहा । तदो तदो ।

परिव्राजिका ॥ सदृष्टिक्षेपं ॥ अतः परं पुनः ॥ सदृष्टिक्षेपं ॥ कथयिष्यामि ।

अत्रभवान्विदिशेश्वरः प्राप्तः ।

देवी । अम्मो भट्ठा ॥ अभ्युत्थातुमिच्छति ॥

राजा । अलमुपचारयन्त्रणया ।

अनुचितनूपुरविरहं नार्हसि तपनीयपीठिकालम्बि ।
चरणं रुजापरीतं कलभाषिणि मां च पीडयितुं ॥ ६१ ॥

धारिणी । जेदु जेदु अय्यउत्तो ।

परिव्राजिका । विजयतां देवः ।

राजा ॥ परिव्राजिकां प्रणाम्योपविश्य च ॥ देवि अपि सह्या वेदना ।

धारिणी । अत्थि मे विसेसो ।

॥ ततः प्रविशति यज्ञोपवीतसंवीतांगुष्ठः संभ्रान्तो विदूषकः ॥

विदूषकः । परित्ताअदु परित्ताअदु भवं । सप्पेणम्हि दट्ठो ।

॥ सर्वे विषण्णाः ॥

राजा । कष्टं कष्टं । क्व भवान्परिभ्रान्तः ।

विदूषकः । देविं देक्खिस्संत्ति आआरपुप्फकारणादो पमदवणं गदोम्हि ।

धारिणी । हद्धी हद्धी अहं एव्व जीविदसंसअणिमित्तं जादा ।

विदूषकः । तहिं असोअत्थपुप्फकारणादो पसारिदो दक्खिणहत्थो । तदो कोडरविणिग्गदेण सप्पव्वविणा कालेण दंसिदोम्हि । णं एदाणि दुवे पदाणि ॥ इति दर्शयति ॥

परिव्राजिका ।

छेदो दंशस्य दाहो वा क्षतस्यारक्तमोक्षणं ।
एतानि दष्टमात्राणामायुष्याः प्रतिपत्तयः ॥ ६२ ॥

संप्रति विषवैद्यानां कर्म ।

राजा । जयसेने ध्रुवसिद्धिः क्षिप्रमाहूयताम् ।

प्रतीहारी । जं देवो आणवेदि ॥ इति निष्क्रान्ता ॥

विदूषकः । अह्नो पावेण मिच्चुणा गिह्नीदोम्हि ।

राजा । मा कातरो भूः । अविषो ऽपि कदाचिद्दंशो भवेत् ।

विदूषकः । कहं ण भाइस्सं । सिमिसिमाअन्ति मे अङ्गाइं ॥ इति विषवेगं रूपयति ॥

धारिणी । हा हा दंसिदं विआरेण अवलम्बध णं ।

॥ पारिपार्श्विका ससंभ्रममवलम्बते ॥

विदूषकः ॥ राजानमवलोक्य ॥ भो बालपिअवअस्सोम्हि दे । अविआरेण अपुत्ताए जणणीए जोग्गक्खेमं वहेहि ।

राजा । मा भैषीः । अचिरात्त्वां वैद्यश्चिकित्सयिष्यति । स्थिरो भव ।

॥ प्रविश्य जयसेना ॥

जयसेना । आणविदो धुवसिद्धी विण्णवेदि । इहज्जेव्व गोदमो आणीअदुत्ति ।

राजा । तेन हि वर्षधरप्रतिगृहीतमेनं तत्रभवतः सकाशं प्रापय ।

जयसेना । तह्ना ।

विदूषकः । भोदि जीवेअं ण वा । जं मए तत्तभवन्तं सेवमाणेण दे अवरद्धं तं मरिसेहि ।

धारिणी । दीहाउसो होहि ।

॥ निष्क्रान्तो विदूषकः प्रतीहारी च ॥

राजा । प्रकृतिभीरुस्तपस्वी । ध्रुवसिद्धेरपि यथार्थनाम्नः सिद्धिं न मन्यते ।

॥ प्रविश्य जयसेना ॥

जयसेना । जेदु जेदु भट्टा । धुवसिद्धी विसबेदि । उदकुम्भविधाणेण सप्पमुद्दग्रं कप्पिदव्वं । ता ग्रणेसीग्रदुत्ति ।

धारिणी । एदं सप्पमुद्दग्रं ग्रङ्गुलीग्रग्रं । पच्छा मह्ह हत्थे देहि णं ।

राजा । जयसेने कर्मसिद्धावाशु प्रतिपत्तिमानय ।

जयसेना । जं देवो ग्राणबेदि ॥ इति निष्क्रान्ता ॥

परिव्राजिका । यथा हृदयमाचष्टे तथा निर्विषो गौतमः ।

राजा । भूयादेवं ।

॥ प्रविश्य जयसेना ॥

जयसेना । जेदु जेदु भट्टा । णिव्वुत्तविसवेगो गोदमो मुहुत्तेण पकिदित्थो संवुत्तो ।

धारिणी । दिट्ठिग्रा वचणीग्रादो मुत्तम्हि ।

प्रतीहारी । एसो उण वाह्नतग्रो ग्रमच्चो विसबेदि । राग्रकज्जं बहु मन्तिदव्वं । दंसणेण ग्रणुगह्न इच्छामित्ति ।

धारिणी । गच्छदु ग्रज्जउत्तो कज्जसिद्धीए ।

राजा । देवि ग्रातपाक्रान्तो ऽयमुद्देशः । शीतक्रियास्य प्रशस्ता । तदन्यत्र नीयतां शयनीयं ।

धारिणी । पालिग्रा ग्रज्जउत्तवग्रणं ग्रणुचिट्ठध ।

॥ परिजनस्तथाप्रक्रान्तः । निष्क्रान्ता देवी परिजनश्च ॥

राजा । जयसेने गूढेन पथा प्रमदवनं प्रापय ।

जयसेना । एदु एदु देवो ।

राजा । जयसेने ननु समाप्तकाम्यो गौतमः ।

जयसेना । अहइं ।

राजा ।

इष्टाधिगमनिमित्तं प्रयोगमेकान्तसाध्यमपि मत्वा ।
संदिग्धमेव सिद्धौ कातरमाशङ्कते चेतः ॥ ६३ ॥

॥ प्रविश्य विदूषकः ॥

विदूषकः । जेदु जेदु भवं । सिद्धाणि दे मङ्गलकम्माणि ।

राजा । जयसेने त्वमपि नियोगमशून्यं कुरु ।

जयसेना । जं देवो आणबेदि ॥ इति निष्क्रान्ता ॥

राजा । गौतम जुद्रा माधविका न खलु किंचिद्विचारितमनया ।

विदूषकः । देवीए अङ्गुलीअमुद्दअं देक्खिअ कहं विआरेदि ।

राजा । न खलु मुद्रामधिकृत्य ब्रवीमि । तयोर्द्वयोः किंनिमित्तो मोक्षः किं वा देव्या परिजनमतिक्रम्य भवान्संदिष्ट इत्येवमनया प्रष्टव्यं ।

विदूषकः । णं पुच्छिदोम्हि । पुणो मन्दस्सबि मे तहि पच्चुप्पसं उत्तरं आसि ।

राजा । कथ्यतां ।

विदूषकः । भणिदा मए । देव्वचिन्तएहिं विण्णाबिदो राआ सोबसग्गं वो णक्खत्तं । सव्वबन्धमोक्खो करीअदुत्ति । तं सुणिअ देवीए इरावदीए चित्तं रक्खन्तीए राआ किल मोअअदित्ति अहं संदिट्ठोत्ति । तदो युज्जदित्ति ताए संवादिदो अत्थो ।

राजा ॥ विदूषकं परिष्वज्य ॥ सखे प्रियो ऽहं तव ।

न हि बुद्धिगुणेनैव सुहृदामर्थदर्शनं ।
कार्यसिद्धिपथः सूक्ष्मः स्नेहेनाप्युपलभ्यते ॥ ६४ ॥

विदूषकः । तुवरदु भवं । समुद्दगेहके सहीसहिदं मालविअं ठाविअ भवन्तं पच्चुग्गदोम्हि ।

राजा । अहमेनां संभावयामि । गच्छाग्रतः ।

विदूषकः । एदु एदु भवं ॥ परिक्रम्य ॥ एदं समुद्दगेहकं ।

राजा ॥ साशङ्कं ॥ वयस्य एषा कुसुमावचयव्यग्रहस्ता सख्यास्त इरावत्याः परिचारिका चन्द्रिका संनिकृष्टमागच्छति । इतस्तावदावां भित्तिगूढौ भवावः ।

विदूषकः । अहो कुम्भीलएहिं कामुएहिं च परिहरणीआ चन्दिआ ।

॥ उभौ यथासमर्थितं कुरुतः ॥

राजा । कथं नु ते सखी मां प्रतिपालयति । एह्येनां गवाक्षमाश्रित्य यावदवलोकयामि ।

विदूषकः । तहा ।

॥ उभौ विलोकयन्तौ स्थितौ ॥

॥ प्रविष्टा मालविका बकुलावलिका च ॥

बकुलावलिका । सहि पणाम भट्टारं ।

मालविका । णमो दे जो पासदो पेक्खीअदि ।

राजा । शङ्के मे प्रतिकृतिं निर्दिशति ।

मालविका ॥ सहर्षं द्वारमवलोक्य ॥ हला मं विप्पलम्भेसि ।

राजा । हर्षविषादाभ्यामत्रभवत्याः प्रीतोऽस्मि ।

सूर्योदये भवति या सूर्यास्तमये च पुण्डरीकस्य ।
वदनेन सुवदनायास्ते समवस्थे क्षणाद्दृष्टे ॥ ६५ ॥

बकुलावलिका । णं एस चित्तगदो भट्टा ।

उभे ॥ प्रणिपत्य ॥ जेदु जेदु भट्टा ।

मालविका । तस्सिं संभमे ठिदा भट्टिणो रूवस्स ण तह वितण्हम्हि जह अज्ज मए भाविदो अवितण्हदंसणो भट्टा ।

विदूषकः । सुदं भवदा । ण किं अत्तभोदी तुए जह दिट्ठा तह ण दिट्ठो भवं । मुधा दाणिं मञ्जूसा विअ रअणभाण्डं जोव्वणगव्वं वहेसि ।

राजा । सखे कुतूहलवानपि निसर्गशालीनः स्त्रीजनः । पश्य

कार्त्स्न्येन निर्वर्णयितुं च रूपं
इच्छन्ति तत्पूर्वसमागमानां ।
ननु प्रियेष्वायतलोचनानां
समग्रवर्तीनि विलोचनानि ॥ ६६ ॥

मालविका । हला का एसा पासपरिवत्तिदवअणेण भट्टिणा सिणिद्धाए दिट्ठीए णिज्झाअदि ।

बकुलावलिका । णं इअं पासगदा इरावदी ।

मालविका । सहि अदक्खिणो विअ मे भट्टा पडिभादि जो सव्वं देवीअणं उज्झिअ एक्काए मुहे बद्धलक्खो ।

बकुलावलिका ॥ आत्मगतं ॥ चित्तगदं भट्टारं परमत्थदो संकप्पिअ असूइस्सदि । भोदु कीलइस्सं दाव एदाए ॥ प्रकाशं ॥ हला भट्टिणो वल्लहा एसा ।

मालविका । तदो किं दाणिं अत्ताणं आआसिअ ॥ इति सासूयं परावर्तते ॥

राजा । सखे पश्य पश्य ।

भ्रूभङ्गभिन्नतिलकं स्फुरिताधरोष्ठं
सासूयमाननमितः परिवर्तयन्त्या ।

कान्तापराधविषये ऽप्यनया विनेतुः
संदर्शितेव ललिताभिनयस्य शिक्षा ॥ ६७ ॥

विदूषकः । अणुणअसज्जो दाणिं होहि ।

मालविका । अज्ज गोदमो पच्छा एव्व सेवदि णं ॥ इति पुनः स्थानान्तराभिमुखी भवितुमिच्छति ॥

बकुलावलिका ॥ मालविकां रुद्ध्वा ॥ ण हि ण हि । कुविदा दाणिं तुमं ।

मालविका । जदि चिरं कुविदं एव्व मं मणेसि एस पच्चाणी अदु कोबो ।

राजा ॥ उपेत्य ॥

कुप्यसि कुवलयनयने चित्रार्पितचेष्टया कथय किमिदं मे ।
ननु तव साक्षादयमहमनन्यसाधारणो दासः ॥ ६८ ॥

बकुलावलिका । जेदु जेदु भट्टा ।

मालविका ॥ आत्मगतं ॥ कहं चित्तगदो भट्टा मए असूइदो ॥ प्रकाशं सव्रीडवचनमञ्जलिं करोति ॥

॥ राजा मदनकातर्यं रूपयति ॥

विदूषकः । किं भवं उदासीणो विअ ।

राजा । अविश्वसनीयत्वात्सख्यास्ते ।

विदूषकः । अत्तभोदीए कहं तव अविस्सासो ।

राजा । श्रूयतां ।

पथि नयनयोः स्थित्वा स्थित्वा तिरोभवति क्षणा
त्सरति सहसा बाह्वोर्मध्यं गताप्यबला सती ।
मनसिजरुजा क्लिष्टस्यैवं समागममायया
कथमपि सखे विश्रब्धं स्यादिमां प्रति मे मनः ॥ ६९ ॥

बकुलावलिका । सहि बहुसो किल भट्टा विप्पलद्धो । ता अत्ता वीससणीओ करीअदु ।

मालविका । मम उण मन्दभागाए सिविणअसमागमोवि भट्टिणो दुल्लहो आसि ।

बकुलावलिका । एदु भट्टा देहि से उत्तरं ।

राजा ।

उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकं ।
तव सख्यै मया दत्तो न सेव्यः सेविता रहः ॥ ७० ॥

बकुलावलिका । अणुगिहीदम्हि ।

विदूषकः ॥ परिक्रम्य ससंभ्रमं ॥ बउलावलिए असोअपल्लवाइं अहिलङ्घिदुं इच्छदि हरिणी । एहि णिवारेम णं ।

बकुलावलिका । तह ॥ इति प्रस्थिता ॥

राजा । एवमेवास्मिन्रक्षणीये ऽविलम्बितेन भवितव्यं ।

विदूषकः । एव्वंपि गोदमो णिद्दिसीअदि ।

बकुलावलिका । अज्जगोदम अहं अप्पआसे चिट्ठामि । तुमं दुवाररक्खओ होहि ।

विदूषकः । जुज्जदि ।

॥ निष्क्रान्ता बकुलावलिका ॥

विदूषकः । इमं दाव फलिहत्थम्भं संसिदो भोमि ॥ तथा कृत्वा ॥ अहो सुहप्फरिसदा सिलाविसेसस्स ॥ इति निद्रायते ॥

॥ मालविका ससाध्वसं तिष्ठति ॥

राजा । विसृज सुन्दरि संगमसाध्वसं
तव चिरात्प्रभृति प्रणयोन्मुखे ।

परिगृह्णाण गते सहकारतां
बमतिमुक्तलताचरितं मयि ॥ ७१ ॥

मालविका । देवीभश्रादो श्रत्तणोबि पिश्रं कादुं ण पारेमि।

राजा । न भेतव्यं ।

मालविका ॥ सोपालम्भं ॥ जो ण भाश्रदि सो मए भट्टिणीदंसणे दिट्ठसमावत्थो भट्टा ।

राजा ।

दाक्षिण्यं नाम बिम्बोष्ठि नायकानां कुलव्रतं ।
तन्मे दीर्घाक्षि ये प्राणास्ते बदाशानिबन्धनाः ॥ ७२ ॥

तदनुगृह्यतां चिरानुरक्तो ऽयं जनः ॥ इति संश्लेषमुपजनयति ॥

॥ मालविका परिहरति नाट्येन ॥

राजा । रमणीयः खलु नवाङ्गनानां मदनविषयावतारः । एषा हि

हस्तं कम्पयते रुणद्धि रसनाव्यापारलोलाङ्गुलीः
स्वौ हस्तौ नयति स्तनावरणतामालिंग्यमाना बलात् ।
पातुं पक्ष्मलनेत्रमुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे ॥ ७३ ॥

॥ ततः प्रविशतीरावती निपुणिका च ॥

इरावती । णिउणिए सव्वं तुमं परिगदत्था चन्दिश्राए । समुद्दगेहकालिन्दसरदो श्रज्जगोदमो दिट्ठोत्ति ।

निपुणिका । श्रसह्रा कहं भट्टिणीए विप्पबीश्रदि ।

इरावती । तेण हि तहिं एव्व गच्छम्ह संसश्रादो मुत्तुं पिश्रवश्रस्सं पुच्छिदुं च ।

निपुणिका । सावसेसं विअ भट्टिणीए वअणं ।

इरावती । अण्णं च । चित्तगदं अज्जउत्तं पसादइस्सं ।

निपुणिका । अह दाणिं कहं णु भट्टा एव्वं अणुणीअदि ।

इरावती । मुद्धे जारिसो चित्तगदो तारिसो एव्व अण्णसंकन्तहि अओ अज्जउत्तो । केवलं उवआरादिक्कमं पमज्जिदुं अअं आरम्भो ।

निपुणिका । इदो इदो भट्टिणी ।

॥ उभे परिक्रामतः ॥

॥ प्रविश्य चेटी ॥

चेटी । जेदु जेदु भट्टिणी । देवी भणादि । ण एसो मस्सरस्स कालो तव बहुमाणं वड्ढेदुं । इअं वअस्सिआए सह णिअलबन्धणे किदा मालविआ । जदि अणुमणेसि अज्जउत्तंपि तव किदे विण्णवइस्सं ।

इरावती । णाअरिए विण्णवेहि देविं । काओ वअं भट्टिणीए णिदिं जेदुं । परिअणणिगलेण मइ दंसिदो अणुग्गहो । कस्स वा पसाएण अअं जणो वड्ढदित्ति ।

चेटी । तह ॥ इति निष्क्रान्ता ॥

निपुणिका ॥ परिक्रम्यावलोक्य च ॥ एस दुवारे समुद्दगेहकस्स विपणिगदो विअ पुसहो गोदमो आसीणो एव्व णिद्दाअदि ।

इरावती । किं णु खु अच्चाहिदं । सावसेसो विअ विसविआरो भवे ।

निपुणिका । पसण्णमुहवण्णो दीसदि । अवि अ धुवसिद्धिणा चिइस्सिदो । ता से असङ्कणिज्जं पावं ।

विदूषकः ॥ उत्स्वप्नायते ॥ भोदि मालविए ।

निपुणिका । सुदं भट्टिणीए । कस्स वा एसो अत्तणीओ ।

अब्भवकारिअसदावे अकिदग्घो सक्कामो । इदो सव्वं कालं सोत्थिव अणमोदएहिं कुक्खिं पूरिअ संपदं मालविअं सिबिणाबेदि ।

विदूषकः । इरावदिं अदिक्कमन्ती होहि ।

निपुणिका । एदं अच्चाहिदं । भुअंगभीअं बम्हबन्धुं इमिणा भुअंगकुडिलेण अत्तणो दण्डकट्ठेण अन्तरिदा ताडइस्सं ।

इरावती । अरुहदि किदग्घो सप्पदंसणं ।

॥ निपुणिका विदूषकस्योपरि दण्डकाष्ठं पातयति ॥

विदूषकः ॥ सहसा प्रबुध्य ॥ अविहा अविहा । दव्वीकरो मे उवरि परिपडिदो ।

राजा ॥ सहसोपसृत्य ॥ न भेतव्यं न भेतव्यं ।

मालविका ॥ अनुसृत्य ॥ मा दाव सहसा णिक्कमिस्ससि । सप्पो त्ति भणादि ।

इरावती । हड्डी हड्डी । भट्टा दाव इदो एव्व धावदि ।

विदूषकः ॥ सप्रहासं ॥ कहं दण्डकट्ठं इदं । अहं पुण आणे । जं मए केदअकण्डएहिं दंसं करिअ सप्पस्स अअसो किदं तं मे फलिदंत्ति ।

॥ ततः प्रविशति पटाक्षेपेण बकुलावलिका ॥

बकुलावलिका । मा खु भट्टा पविसदु । इह कुडिलगई सप्पो विअ दीसदि ।

इरावती ॥ राजानं सहसोपसृत्य ॥ अवि णिव्विग्घमणोरहो दिवासंकेदो मिहुणस्स ।

॥ सर्वे इरावतीं दृष्ट्वा संभ्रान्ताः ॥

राजा । प्रिये अपूर्वोऽयमुपचारः ।

इरावती । बउलावलिए डुट्ठाहिश्रारविसश्रा संपुण्णा दे पइण्णा ।

बकुलावलिका । पसीदड भट्टिणी । किं मए किदंत्ति देवो पुच्छिदव्वो । दद्दुरा वाहरन्तित्ति किं देवो पुहविं वरिसिडं सुम रेदि ।

विदूषकः । मा दाव भोदीए दंसणमित्तेण अत्तभवं पणिबाउल ङ्घणं विसुमरिदो भोदि । तुमं पुण पसादं ण गेण्हसि ।

इरावती । कुबिदाबि अहं किं करइस्सं ।

राजा । एवमेतत् । अस्थाने कोप इत्यनुपपन्नं त्वयि ।

कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रतां ।
अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ॥ ७४ ॥

इरावती । अत्थाणेत्ति सुट्ठु अवधारिदं अज्जउत्तेण । अण्णसंके देसु अम्हाणं भाअधेएसु जदि उण कुप्पे ण अहं हस्सा भवे ।

राजा । त्वमन्यथा कल्पयसि । अहं पुनः सत्यमेव कोपस्थानं न पश्यामि । कुतः ।

नार्हति कृतापराधो ऽप्युत्सवदिवसेषु परिजनो बन्धं ।
इति मोचिते मयैते प्रणिपतितुं मामुपगते च ॥ ७५ ॥

इरावती । णिउणिए गच्छिअ देविं विण्णबेहि । दिट्ठं पडिब क्खवादित्तणं । अवहिदं मे हिअअं अज्जेत्ति ।

निपुणिका । तह ॥ इति निष्क्रान्ता ॥

विदूषकः ॥ आत्मगतं ॥ अणत्थो संपडिदो बन्धणब्भट्ठो गेहकबो दश्रो विडालिआए आलोए पडिदो ।

॥ प्रविश्य निपुणिका ॥

निपुणिका । देवि जदिच्छादिट्ठाए माह्लविआए आचक्खिदं । एव्वं णिमित्तं ॥ इति कर्णे कथयति ॥

इरावती ॥ आत्मगतं ॥ उववण्णं सव्वं एव्व । बम्हबन्धुणा उब्भिण्णो पओओ ॥ विदूषकं विलोक्य प्रकाशं ॥ इअं अस्स कामतन्तसचिवस्स बम्हबन्धुणो णीदी ।

विदूषकः । भोदि जदि णीदीए एक्कंपि अक्खरं पढिअं णं अत्तभवं संसिदो भवे ।

राजा ॥ अपवार्य ॥ कथं नु खल्वस्मात्संकटान्मोच्यावहे ।

॥ प्रविश्य सावेगा जयसेना ॥

जयसेना । देव कुमारी वसुलच्छी कन्दुअं अणुधावन्ती पिङ्गलवाणरेण बलिअं वित्तासिदा । अङ्कणिसण्णा देवीए पवादकिसलअं विअ वेवमाणा ण किंपि पडिबज्जदि ।

राजा । कष्टं कष्टं । कातरो बालभावः ।

इरावती ॥ सावेगं ॥ तुअरदु तुअरदु अज्जउत्तो णं समासासइदुं मा से संदावजणिदो विआरो वड्ढदु ।

राजा । अहमेनां संज्ञापयामि ॥ इति सत्वरं निष्क्रामति ।

विदूषकः । साहु रे पिङ्गलवाणर साहु । परित्तादो तुए सवक्खो ।

॥ निष्क्रान्तो राजा विदूषकश्चेरावती निपुणिका प्रतीहारी च ॥

मालविका । देविं चिन्तिअ वेवइ मे हिअअं । ण आणे संपदि किं अदो अणुभविदव्वं भविस्सदित्ति ।

॥ नेपथ्ये ॥ अच्चरिअं अच्चरिअं । अपुण्णे पञ्चरत्ते दोहलस्स मउले

ह्निं संणद्धो तबणीआसोओ । जाव देवीए णिवेदेमि ।

॥ उभे श्रुत्वा प्रहृष्टे ॥

बकुलावलिका । आसासदु सही । सच्चपइण्णा देवी ।

मालविका । तेण अहं पमदवणपालिआए पिढ़दो भोमि ।

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति चतुर्थो ऽङ्कः ॥

प्रथमः ।

परभृतकलव्याहारेषु त्वमात्तरतिर्मधुं
नयसि विदिशातीरोद्यानेष्वनङ्ग इवाङ्गवान् ।
विजयकरिणामालानाङ्कैरुपोढबलस्य ते
वरद वरदारोधो वृक्षैः सहावनतो रिपुः ॥ ७६ ॥

द्वितीयः ।

विरचितपदं वीरप्रीत्या सुरोपमसूरिभि
श्चरितमुभयोर्मध्ये कृत्य स्थितं क्रथकैशिकान् ।
तव कृतवतो दण्डानीकैर्विदर्भपतेः श्रियं
परिघगुरुभिर्दोर्भिर्विष्णोः प्रसह्य च रुक्मिणीं ॥ ७७ ॥

प्रतीहारी । एसो जअसद्दसूइदप्पत्थाणो भट्टा इदो एव्व आअ
च्छदि । अहंपि दाव इमस्स मुहादो समोसरिअ एदं मुहालिन्दतो
रणं समस्सिदा भोमि ॥ इत्येकान्ते स्थिता ॥

॥ प्रविश्य सवयस्यो राजा ॥

राजा ।

कान्तां विचिन्त्य सुलभेतरसंप्रयोगां
श्रुत्वा विदर्भपतिमानमितं बलैश्च ।
धाराभिरातप इवाभिहतं सरोजं
दुःखायते च हृदयं सुखमश्नुते च ॥ ७८ ॥

विदूषकः । इह पेक्खामि एकन्तसुहिदो भवं भविस्सदित्ति ।

राजा । कथमिव ।

विदूषकः । अज्ज किल देवीए धारिणीए पण्डिदकोसिआ भ
णिदा । भअवदि तुमं जदि पसाहणगव्वं वहेसि दंसेहि दाव मा

लविआए सरीरे विवाहणेवत्थंत्ति । तदा सविसेसकोदूहलं अलं किदा मालविआ तत्तभोदीए । कदावि पूरए भवदो मणोरहं ।

राजा । सखे मदपेक्षामनुप्राप्यानया धारिण्या पूर्वचरितैः संभाव्यत एवैतत् ।

प्रतीहारी ॥ उपगम्य ॥ जेदु जेदु देवो । देवी विण्णवेदि । तवणीआसोअस्स कुसुमुग्गमसिरिं अज्जउत्तेण सह पच्चक्खीकादुं इच्छामित्ति ।

राजा । ननु तत्रैव देवी ।

प्रतीहारी । अहइं । जहा तुह संमाणसुहं अन्तेउरं विसज्जिअ मालविआपुरोएण अत्तणो परिअणेण सह देवं पडिबालेदि ।

राजा ॥ सहर्षं विदूषकं विलोक्य ॥ जयसेने गच्छाग्रतः ।

प्रतीहारी । एदु एदु देवो ॥ इति परिक्रामति ॥

विदूषकः ॥ विलोक्य ॥ भो वअस्स किंचि परिवुत्तजोव्वणो विअ वसन्तो पमदवणे लक्खीअदि ।

राजा । यदाह भवान् ।

अग्रे विकीर्णकुरवकफलजालकह्रीयमानसहकारं ।
परिणाममुखमिदमृतोरुत्सुकयति यौवनं चेतः ॥ ७९ ॥

विदूषकः । भो अअं सो दिण्णणेवत्थो विअ कुसुमत्थवएहिं तव णीआसोओ । आलोएदु भवं ।

राजा । स्थाने खलु प्रसवमन्थरो ऽभ्युदयमनन्यसाधारणीं शोभां पुष्यति । पश्य

सर्वाशोकलतानां प्रथमं सूचितवसन्तविभवानां ।
निर्वृत्तदोहदे ऽस्मिन्संक्रान्तानीव मुकुलानि ॥ ८० ॥

विदूषकः । तह वीसद्धो होहि । अम्हासु तहगदेसुवि धारि

णी पासपरिवत्तिअं मालविअं अणुमणोदि ।

राजा ॥ सहर्षं ॥ पश्य पश्य सखे ।

मामियमभ्युत्तिष्ठति देवी विनयादनूत्थिता प्रियया ।
विस्मृतहस्तकमलया नरेन्द्रलक्ष्म्या वसुमतीव ॥ ८१ ॥

॥ ततः प्रविशति धारिणी मालविका परिव्राजिका विभवतश्च परिवारः ॥

मालविका ॥ आत्मगतं ॥ जाणामि णिमित्तं कोदुआलंकारस्स । तह बि मे हिअअं विसिणीपत्तगदं विअ सलिलं वेबदि । दक्खिणेदरं णअणं अ बहुसो फुरइ ।

विदूषकः । भो वअस्स विवाहणेबत्थेण सविसेसं खु सोहदि अत्तभोदी मालविआ ।

राजा । पश्याम्येनां । एषा

अनतिलम्बिदुकूलनिवासिनी
लघुभिराभरणैः प्रतिभाति मे ।
उडुगणैरुदयोन्मुखचन्द्रिका
हतहिमैरिव चैत्रविभावरी ॥ ८२ ॥

धारिणी ॥ उपेत्य ॥ जेदु जेदु अज्जउत्तो ।

विदूषकः । वड्ढदु भोदी ।

परिव्राजिका । विजयतां देवः ।

राजा । भगवति अभिवादये ।

परिव्राजिका । अभिप्रेतसिद्धिरस्तु ।

देवी ॥ सस्मितं ॥ अज्जउत्त एस दे अम्हेहिं तरुणीजणसहाअस्स असोओ संकेदगेहको संकप्पिदो ।

विदूषकः । भो आराहिओसि ।

राजा ॥ सव्रीडमशोकमभितः परिक्रामन् ॥

नायं देव्या भाजनत्वं न नेयः
सत्काराणामीदृशानामशोकः ।
यः सावज्ञो माधवश्रीनियोगे
पुष्पैः शंसत्यादरं त्वत्प्रयत्ने ॥ ८३ ॥

विदूषकः । भो वीसद्धो भविअ जोव्वणवदिं पेक्ख ।

धारिणी । कं ।

विदूषकः । तवणीआसोअस्स कुसुमसोहं ।

॥ सर्वं उपविशन्ति ॥

राजा ॥ मालविकां विलोक्यात्मगतं ॥ कष्टः खलु संनिधिवियोगः ।

अहं रथाङ्गनामेव प्रिया सहचरीव मे ।
अननुज्ञातसंपर्का धारिणी रजनीव नौ ॥ ८४ ॥

॥ प्रविश्य कञ्चुकी ॥

कञ्चुकी । जयतु जयतु देवः । अमात्यो विज्ञापयति । तस्मिन्विदर्भराजोपायने द्वे शिल्पकारिके मार्गपरिश्रमादलघुशरीरे इति कृत्वा न प्रवेशिते । संप्रति देवोपस्थानयोग्ये । तदाज्ञां देवो दातुमर्हति ।

राजा । प्रवेशय ते ।

कञ्चुकी । यदाज्ञापयति देवः ॥ इति निष्क्रम्य ताभ्यां सह प्रविष्टः ॥ इत इतो भवत्यौ ।

प्रथमा ॥ जनान्तिकं ॥ हला रमणीए अपुव्वं विअ इमं राअउलं पविसन्तीए मे पसीददि हिअअब्भन्तसंगदो अप्पा ।

द्वितीया । जोसिणिए महवि एव्वं । अत्थि खु लोअप्पवादो ।

आगामि सुहं दुक्खं वा हिअअसमवत्था कहेदित्ति ।

प्रथमा । सच्चो दाणिं होदु ।

कञ्चुकी । एष देव्या सह देवस्तिष्ठति । उपसर्पेतां भवत्यौ ।

॥ उभे उपसर्पतः । चेट्यौ मालविकां परिव्राजिकां च दृष्ट्वा परस्परमवलोकयतः ॥

उभे ॥ प्रणिपत्य ॥ जेदु जेदु भट्टा । जेदु जेदु भट्टिणी ॥ राज्ञाज्ञयोभे प्रविष्टे ॥

राजा । कस्यां कलायामभिविनीते भवत्यौ ।

उभे । भट्टा संगीदए अब्भन्तरम्ह ।

राजा । देवि गृह्यतामनयोरन्यतरा ।

धारिणी । मालविए इदो । दक्खदरा संगीदसहाइणी दे का रुच्चदि ।

उभे ॥ मालविकां दृष्ट्वा ॥ अम्मो भट्टिदारिआ । जेदु जेदु भट्टिदारिआ

॥ इति प्रणिपत्य तया सह बाष्पं विसृजतः ॥

॥ सर्वे विलोकयन्ति ॥

राजा । के भवत्यौ का वेयं ।

प्रथमा । अम्हाणं भट्टिदारिआ ।

राजा । कथमिव ।

उभे । सुणादु भट्टा । जो सो भट्टिणा विजअदण्डेहिं विदब्भणाहं वसीकरिअ बन्धणादो मोइदो कुमारो माहवसेणो णाम । तस्स इअं कणीअसी बहिणिआ मालविआ णाम ।

धारिणी । कहं राअदारिआ इअं । चन्दणं खु मए पादुआव देसेण दूसिदं ।

राजा । अथात्रभवती कथमित्थंभूता ।

मालविका ॥ निःश्वस्यात्मगतं ॥ विहिणिओएण ।

द्वितीया । भट्टिदाश्रादवसं गदे भट्टिदारए माहवसेणे तस्स श्रम च्चेण श्रज्जसुमदिणा श्रम्हारिसं परिश्रणं उज्झिश्र गूढं श्राणीदा एसा ।

राजा । श्रुतपूर्वं मयैतत् । ततस्ततः ।

द्वितीया । भट्टा श्रदो श्रवरं ण श्राणामि ।

परिव्राजिका । श्रतः परमहं मन्दभागिनी कथयिष्यामि ।

उभे । भट्टिदारिए श्रज्जकोसिईए विश्र सरसंजोगो । णं सा एव्व ।

मालविका । श्रह्इं ।

उभे । जदिवेसधारिणी श्रज्जकोसिई दुक्खेण विभावीश्रदि । भ श्रवदि णमो दे ।

परिव्राजिका । स्वस्ति भवतीभ्यां ।

राजा । कथमाप्तवर्गो ऽयं भगवत्याः ।

परिव्राजिका । एवमेतत् ।

विदूषकः । तेण कहेदु दाणिं भश्रवदी श्रत्तभोदीवुत्तन्तं दाव श्रसेसं ।

परिव्राजिका ॥ सविक्लवं ॥ तावच्छ्रूयतां । माधवसेनसेविनं ममा ग्रजं सुमतिमवगच्छ ।

राजा । उपलक्षितः । ततस्ततः ।

परिव्राजिका । इमां तथागतभ्रातृकां मया सार्धमपवाह्य भवत्सं बन्धापेक्षया पथिकसार्थं विदिशागामिनमनुप्रविष्टः ।

राजा । ततस्ततः ।

परिव्राजिका । स च गन्तव्यमन्तरेण निविष्टो गताध्वा बणिग्जनः ।

राजा । किं चान्यत् ।

परिव्राजिका । ततः

तूणीरपट्टपरिणद्धभुजान्तराल
मापार्ष्णिलम्बिशिखिबर्हकलापधारि ।
कोदण्डपाणि निनदत्प्रतिरोधकाना
मापातदुःप्रसहमाविरभूदनीकं ॥ ८५ ॥

॥ मालविका भयं नृपयति ॥

विदूषकः । भोदि मा भाआहि । अदिक्कन्तं खु अत्तभोदी कहेदि ।

राजा । ततस्ततः ।

परिव्राजिका । ततो मुहूर्तबद्धायुधास्ते पराङ्मुखीभूताः सार्थवाहयोद्धारस्तस्कराः ।

राजा । भगवति अतः कष्टमिदानीं श्रोतव्यं ।

परिव्राजिका । ततः स मत्सोदर्यः

इमां परीप्सुर्दुर्जातेः पराभिभवकातरां ।
भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः ॥ ८६ ॥

मालविका । आं हा हदो सुमदी णं ।

द्वितीया । तदो खु भट्टिदारिआए इअं समवत्था संवुत्ता ।

॥ परिव्राजिका वाष्पं सृजति ॥

राजा । भगवति तनुत्यजामीदृशी लोकयात्रा । न शोच्यस्तत्र भवान् । सफलीकृतभर्तृपिण्डस्तपस्वी ।

परिव्राजिका । ततोऽहं मोहमुपागता । यावत्संज्ञां प्रतिलेभे तावदियं दुर्लभदर्शना संवृत्ता ।

राजा । महत्खलु कृच्छ्रमनुभूतं तत्रभवत्या ।

परिव्राजिका । ततो भ्रातुः शरीरमग्निसात्कृत्वा पुनर्नवीकृतदुःखया त्वदीयं देशमवतीर्य काषाये गृहीते ।

राजा । युक्तः सज्जनस्यैष पन्थाः । सेयमाटविकेभ्यो वीरसेनं वीरसेनाद्देवीं गता । देवगृहे लब्धप्रवेशया मया दृष्टेत्येवमवसानं कथायाः ।

मालविका ॥ आत्मगतं ॥ किं णु खु भट्टा भणादि ।

राजा । अहो परिभवे प्रहारिणो विनिपातः । कुतः

प्रेष्यभावेन नामेयं देवीशब्दक्षमा सती ।
स्नानीयवस्त्रक्रियया पत्रोर्णं वोपयुज्यते ॥ ८७ ॥

धारिणी । भअवदि तुए अहिजणवदिं मालविअं अणाचक्खन्तीए असंपदं किदं ।

परिव्राजिका । शान्तं पापं । कारणेन खलु मया नैर्घृण्यमवलम्बितं ।

धारिणी । किं विअ तं कारणं ।

परिव्राजिका । इयं पितरि जीवति केनापि देवयात्रागतेन शिवादेशकेन साधुना मत्समक्षं व्यादिष्टा । वत्सरमात्रमियं प्रेष्यभावमनुभूय ततः सदृशभर्तृगामिनी भविष्यति । विदर्भगतमनुष्ठेयमवधारितमस्माभिः । देवस्य तावदभिप्रायं श्रोतुमिच्छामीति ।

राजा । तत्रभवतोर्यज्ञसेनमाधवसेनयोर्द्वैराज्यमवस्थापयितुकामोऽस्मि ।

तौ पृथग्वरदाकूले शिष्टामुत्तरदक्षिणे ।
नक्तं दिनं विभज्योभौ शीतोष्णकिरणाविव ॥ ८८ ॥

कञ्चुकी । देव एवममात्यपरिषदे विज्ञापयामि ।

॥ राजांगुल्यानुमन्यते ॥

॥ निष्क्रान्तः कञ्चुकी ॥

प्रथमा ॥ जनान्तिकं ॥ भट्टिदारिए दिट्ठिआ भट्टिदारओ अद्धरज्जे पडिट्ठं गमिस्सदि ।

मालविका । एदं दाव बहुमणिदव्वं जो जीविदसंसआदो विमुत्तो ।

॥ पुनः प्रविश्य कञ्चुकी ॥

कञ्चुकी । विजयतां देवः । अमात्यो देवस्य विज्ञापयति । कल्याणी देवस्य बुद्धिः । मन्त्रिपरिषदो ऽप्येतदेव दर्शनं ।

द्विधा विभक्तां श्रियमुद्वहन्तौ
धुरं रथाश्वाविव संगृहीतुः ।
तौ स्थास्यतस्ते नृपतेर्निदेशे
परस्परावग्रहनिर्विकारौ ॥ ८१ ॥

राजा । तेन हि मन्त्रिपरिषदं ब्रूहि । सेनान्ये विरसेनाय कथ्यतामेवं क्रियतामिति ।

कञ्चुकी । यदाज्ञापयति देवः ॥ इति निष्क्रम्य सप्राभृतकं लेखं गृहीत्वा पुनः प्रविष्टः ॥

कञ्चुकी । अनुष्ठिता प्रभोराज्ञा । अयं देवस्य सेनापतेः पुष्यमित्रस्य सकाशात्सोत्तरीयप्राभृतको लेखः प्राप्तः । प्रत्यक्षीकरोत्वेनं देवः ।

॥ राजोत्थाय प्राभृतकं सोपचारं गृहीत्वा सलेखं परिजनायार्पयति । परिजनो लेखं नाट्यनोद्घाटयति ॥

धारिणी । अम्महे तदोमुहं एव्व णो हिअअं । सुणिस्सं दाव गुरुअणकुसलाणन्तरं वसुमित्तस्स वुत्तन्तं । अदिभारे खु पुत्तओ सेणापदी णिउत्तो ।

राजा ॥ उपविश्य वाचयति ॥ स्वस्ति यज्ञशरणात्सेनापतिः पुष्यमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति । विदितमस्तु । यो ऽसौ राजयज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं

गोप्तारमादिश्य वत्सराय निर्वर्तनीयो निरर्गलस्तुरंगमो विसर्जितः । स सिन्धोर्दक्षिणं रोधसि चरन्नश्वानीकेन यवनेन प्रार्थितः । तत उभयोः सेनयोर्महानासीत्संमर्दः ।

॥ धारिणी विषादं नाटयति ॥

राजा । कथमीदृशं संवृत्तं ॥ पुनर्वाचयति ॥

ततः परान्पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः ॥ १० ॥

धारिणी । इमिणा आससिदं मे हिअअं ।

राजा ॥ लेखशेषं वाचयति ॥ सो ऽहमिदानीमंशुमतेव सगरः पौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति । अनुगृहीतो ऽस्मि ।

परिव्राजिका । दिष्ट्या पुत्रविजयेन दंपती वर्धेते ।

भर्तासि वीरपत्नीनां श्लाघ्यानां स्थापिता धुरि ।
वीरसूरिति शब्दो ऽयं तनयात्त्वामुपस्थितः ॥ ११ ॥

धारिणी । भोदि परितुट्ठम्हि जं पिदरं अणुजादओ वच्छओ ।

राजा । मौद्गल्य ननु कलभेन यूथपतेरनुकृतं ।

कञ्चुकी ।

नैतावता वीरविजृम्भितेन
चित्तस्य नो विस्मयमादधाति ।
यस्याप्रधृष्यः प्रभवस्त्वमुच्चै
रग्नेरपां दग्धुरिवोरुजन्मा ॥ १२ ॥

राजा । मौद्गल्य यज्ञसेनश्यालमुरीकृत्य मुच्यन्तां सर्वे बन्धनस्थाः ।

कञ्चुकी । यदाज्ञापयति देवः ॥ इति निष्क्रान्तः ॥

धारिणी । जयसेणे गच्छ मेलकप्पमुहीणं अत्तेउराणं पुत्तअस्स वुत्तन्तं णिवेदेहि ।

॥ प्रतीहारी प्रस्थिता ॥

धारिणी । एहि दाव ।

प्रतीहारी ॥ प्रतिनिवृत्य ॥ इअम्हि ।

धारिणी ॥ जनान्तिकं ॥ जं मए असोअदोहलणिमित्तेए मालविआए पडिस्सादं तं से अभिअणं च णिवेदिअ मम वअणेण इरावदिं अणुणेहि । तुए खु अअं संवादो ण भंसिदव्वोत्ति ।

प्रतीहारी । जं देवी आणवेदि ॥ इति निष्क्रम्य पुनः प्रविश्य च ॥ भट्टिणि पुत्तविजअणिमित्तेण परितोसेण अत्तेउराणं आभरणाणं मञ्जूसिअम्हि संवुत्ता ।

धारिणी । अलं । किं अच्चरिअं । साधारणो णं अब्भुदओ ।

प्रतीहारी ॥ जनान्तिकं ॥ भट्टिणि इरावदी विण्णवेदि । सरिसं खु पहुवीए पल्लवतीए तव वअणं । संकप्पिदे ण जुज्जदि अण्णहा कादुंत्ति ।

धारिणी । भअवदि तुए अणुमदं इच्छामि अज्जसुमदिणा पढमं किदं अज्जउत्तस्स मालविअं उववादेदुं ।

परिव्राजिका । इदानीमपि त्वमस्याः प्रभवसि ।

धारिणी ॥ मालविकां हस्ते गृहीत्वा ॥ इमं अज्जउत्तो पिअणिवेदणाणुरूवं पारितोसिअं पडीच्छदु ।

॥ राजा व्रीडां नाटयति ॥

धारिणी ॥ सस्मितं ॥ किं अवधीरेदि अज्जउत्तो ।

विदूषकः । एसो लोअधणावग्धरो लज्जाउलो होदित्ति ।

॥ राजा विदूषकमवेक्षते ॥

विदूषकः । अह्व देवीए अकुकिदप्पणिव्विसेसं मालविअं अत्त भवं पडिगेण्हिदुं इच्छदि ।

धारिणी । एदाए अ राअदारिआए अहिजणेण दिषो एव्व देवीसद्दो । किं पुणरुत्तेण ।

परिव्राजिका ।

अस्माकमुत्सवमणिर्मणिजातिपुरस्कृतः ।
जातिरूपेण कल्याणि तर्हि संयोगमर्हति ॥ १३ ॥

धारिणी । मरिसेदु भअवदी अब्भुदकहाए पढमं णालक्खिदं । जअसेणे गच्छ दाव कोसेअं आणेहि ।

प्रतीहारी । जं भट्टिणी आणवेदि ॥ इति निष्क्रम्य पत्रोर्णां गृहीत्वा प्रविश्य ॥ देवि एदं ।

धारिणी ॥ मालविकामवगुण्ठनवतीं कृत्वा ॥ अज्जउत्त इअं पडिच्छीअ ।

राजा । त्वच्छासनं प्रत्यनुरक्ता वयं ॥ अपवार्य ॥ हन्त प्रतिगृहीतं ।

विदूषकः । अम्हहे देवीए अणुऊलदा धारिणीए ॥ इति परिजनमवलोकयति ॥

परिजनः ॥ मालविकामुपेत्य ॥ जेदु जेदु भट्टिणी ।

॥ धारिणी परिव्राजिकां निर्वर्णयति ॥

परिव्राजिका । देवि नैतच्चित्रं त्वयि ।

प्रतिपक्षेणापि पतिं सेवन्ते भर्तृवत्सलास्तन्व्यः ।
अन्यसरितामपि रसं समुद्रगाः प्रापयन्त्युदधिं ॥ १४ ॥

॥ प्रविश्य निपुणिका ॥

निपुणिका । जेदु जेदु भट्टा । इरावदी विण्णवेदि । जं हि उब

आरादिक्कमेण तदा अहं भट्टिणी अवराद्धा । णं सो अत्तणो भट्टा । अणुपदं भट्टिणी अणूवं एव्व मए आअरिअं । संपदं पुष्ममणोरहो भट्टा जाओ । अहं संपसादमेत्तेण संभावइदव्वेत्ति ।

धारिणी । णिडणिए वसन्ते सेविदं अज्जउत्तो जाणिस्सदित्ति ।

निपुणिका । अणुगिहीदम्हि ॥ इति निष्क्रान्ता ॥

परिव्राजिका । देव त्वद्युक्ता त्वत्संबन्धेन चरितार्थं माधवसेनं त्वदाज्ञया दृष्ट्वा नयनसाफल्यं कर्तुमिच्छामि ।

धारिणी । ण जुत्तं भअवदि अम्हाणं परिच्चत्तुं ।

राजा । भगवति मदीयेष्वेव लेखेषु तत्रभवतस्त्वामुद्दिश्य सभाजनानि यातयिष्यामः ।

परिव्राजिका । युवयोः स्नेहात्परवानयं जनः ।

धारिणी । आणवेदु अज्जउत्तो । भूओवि दे किं पिअं उवअरिस्सं ।

राजा । मम तावदेतावदेव प्रियं ।

त्वं मे प्रसादसुमुखी भव चण्डि नित्य
मेतावदेव मृगये प्रतिपक्षहेतोः ।
आशास्यमीतिविगमप्रभृति प्रजानां
संपत्स्यते न खलु गोप्तरि नाग्निमित्रे ॥ १५ ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति पञ्चमो ऽङ्कः ॥

अथ

# प्राकृतभाषाव्याख्या

॥ पत्रं ५ ॥

चेटी । आज्ञप्तास्मि देव्या धारिण्याचिरप्रवृत्तोपदेशकं छलिकं नाम नाट्यकमन्तरेण कीदृशी मालविकेति नाट्याचार्यमार्यगणदासं प्रष्टुं । तथावत्संगीतशालां गच्छामि ।

प्रथमा । हला कौमुदिके कुतस्त इयं धीरता यत्समीपे ऽप्यतिक्रामन्तीतो दृष्टिं न ददासि ।

द्वितीया । अहह बकुलावलिका । सखि देव्यायिदं शिल्पिसकाशादानीतं नागमुद्रासनाथमंगुलीयकं स्निग्धं निर्भालयन्ती तवोपालम्भे पतितास्मि ।

प्रथमा । स्थाने सज्जति ते दृष्टिः । अनेनांगुलीयकेनोद्भिन्नकिरणकेशरेण कुसुमित इव ते ऽग्रहस्तः ।

द्वितीया । हला कुत्र प्रस्थितासि ।

प्रथमा । देव्या वचनेन नाट्याचार्यमार्यगणदासं प्रष्टुमुपदेशग्रहणे कीदृशी मालविकेति ।

द्वितीया । सखि ईदृशेन व्यापारेणासंनिहितापि सा भर्त्रा कथं दृष्टा ।

॥ पत्रं ६ ॥

प्रथमा । आं । स जनो देव्याः पार्श्वगतश्चित्रे दृष्टः ।

द्वितीया । कथमिव ।

प्रथमा । शृणु । चित्रशालां गता देवी यदा प्रत्यग्रवर्णरागां चित्रलेखामाचार्यस्यावलोकयन्ती तिष्ठति । तस्मिन्नन्तरे भर्तोपस्थितः ।

द्वितीया । ततस्ततः ।

प्रथमा । उपचारानन्तरमेकासनोपविष्टेन भर्त्रा चित्रगताया देव्याः परिजनमध्यगतामासन्नपरिचारिकां दृष्ट्वा देवी पृष्टा ।

द्वितीया । किमिति ।

प्रथमा । अपूर्वेयं दारिका देव्यासन्ना लिखिता किंनामधेयेति ।

द्वितीया । आकृतिविशेष आदरः पदं करोति । ततः ।

प्रथमा । ततो ऽवधीरितवचनो भर्ता शङ्कितो देवीं पुनरप्यनुबन्द्धुं प्रवृत्तः । ततः कुमार्या वसुलक्ष्म्याचष्टं । आर्य एषा मालविकेति ।

द्वितीया । सदृशं खल्वेतद्बालभावस्य । ततोऽपरं कथय ।

प्रथमा । किमन्यत् । सांप्रतं मालविका सविशेषं भर्तुर्दर्शनपथाद्रक्ष्यते ।

द्वितीया । हला अनुतिष्ठात्मनो नियोगं । अहमप्येतदंगुलीयकं देव्यायुपनेष्यामि ।

प्रथमा । एष नाट्याचार्यः संगीतशालान्निर्गच्छति । तावदस्यात्मानं दर्शयामि ।

॥ पत्रं ७ ॥

बकुलावलिका । आर्य वन्दे ।

बकुलावलिका । आर्य देवी पृच्छति । अप्युपदेशग्रहणे नातिक्लिश्यते वः शिष्या मालविकेति ।

बकुलावलिका । अतिक्रामन्तीमिवेरावतीं प्रेक्षे । कृतार्थेदानीं वः शिष्या यस्यां गुरुजन एवं तुष्यति ।

बकुलावलिका । अस्ति देव्या वर्णावरो भ्राता वीरसेनो नाम । स भर्त्रान्तपालदुर्गे नर्मदातीरे स्थापितः । तेन शिल्पाधिकारे योग्येयं दारिकेति भगिन्या देव्या उपायनं प्रेषिता ।

॥ पत्रं ८ ॥

बकुलावलिका । आर्य कुत्रेदानीं वः शिष्या ।

बकुलावलिका । तेन ह्यनुजानातु मामार्यः । यावदस्या आर्यपरितोषनिवेदनेनोत्साहं वर्धयामि ।

॥ पत्रं ९ ॥

विदूषकः । आज्ञप्तोऽस्मि तत्रभवता राज्ञा । गौतम चिन्तय तावदुपायं यथा मे यदृच्छादृष्टप्रतिकृतिर्मालविका प्रत्यक्षदर्शना भवतीति । मया च तत्तथाकृतं तावदस्य निवेदयामि ।

॥ पत्रं १० ॥

विदूषकः । वर्धतां भवान् ।

विदूषकः । प्रयोगसिद्धिं पृच्छ ।

विदूषकः । एवमिव ।

विदूषकः । फलमपि द्रक्ष्यसि ।

॥ पत्रं १२ ॥

विदूषकः । समर्थं प्रतिज्ञातं ।

विदूषकः । सुष्ठु भवान्भणाति ।

धारिणी । भगवति हरदत्तस्य गणदासस्य च संरम्भं कथं प्रेक्षसे ।

धारिणी । यद्यप्येवं तथापि राजपरिग्रहोऽस्य प्रभुत्वमुपहरति ।

विदूषकः । अपिहा अपिहा । उपस्थिता देवी पीठमर्दिकां पण्डितकौशिकीं पुरस्कृत्य तत्रभवती धारिणी ।

॥ पत्रं १३ ॥

धारिणी । जयतु जयत्वार्यपुत्रः ।

॥ पत्रं १४ ॥

देवी । यदि मां पृच्छसि तदैतेषां विवाद एव न मे रोचते ।

विदूषकः । भो पश्याम उदरंभरिसंवादं । किं सुधा वेतनदानेनैतेषां ।

देवी । ननु कलहप्रियोऽसि ।

विदूषकः । मैवं चण्डि । अन्योन्यकलहप्रियाणां मत्तहस्तिनामेकतरस्मिन्ननिर्जिते कुत उपशमः ।
विदूषकः । श्रुतमार्याभ्यां भगवत्या वचनं । एष पिण्डितस्य उपदेशदर्शनान्निर्णय इति ।
देवी । यदा पुनर्मन्दमेधा शिष्योपदेशं मलिनयति । तदाचार्यस्य दोषः ।

॥ पत्रं १५ ॥

देवी । कथमिदानीं । अलमार्यपुत्रस्योत्साहकारणं मनोरथं परिपूर्य । विरम निरर्थादारम्भात् ।
विदूषकः । सुष्ठु भवती भणति । भो गणदास संगीतकपदोपलब्धसरस्वत्युपायनमोदकानि खाद मानस्य किं ते सुलभनिग्रहेण विवादेन ।
देवी । अचिरोपनीता ते शिष्या । अपरिनिष्ठितस्योपदेशस्य पुनरनार्यमावेदनं ।
देवी । तेन हि द्वावपि भगवत्यायुपदेशं दर्शयतं ।
देवी । मूढे परिव्राजिके मां जाग्रतीमपि सुप्तामिव करोषि ।

॥ पत्रं १६ ॥

विदूषकः । ननु सकारणमेव । आत्मनः पक्षो रक्षितव्यः । ननु दिष्ट्या कोपव्याजेन देव्या परित्रातो भवान् । सुशिक्षितो ऽपि सर्व उपदेशदर्शनेन निर्ह्लादो भवति ।
देवी । का गतिः । प्रभवत्याचार्यकः शिष्यजनस्य ।
देवी । भण विस्रब्धं । प्रभविष्यति प्रभुरात्मनः परिजनस्य ।
देवी । भगवति भणेदानीं ।
विदूषकः । तेन हि द्वावपि वर्गापेक्षागृहे संगीतरचनां कृत्वात्रभवतो दूतं प्रेषयतं । अथ वा मृदङ्गशब्द एव न उत्थापयिष्यति ।

॥ पत्रं १७ ॥

देवी । जयी भवत्वार्यः । ननु विजयप्रत्यर्थिन्यहमार्यस्य ।
देवी । यदि राजकार्येष्वपीदृशी निपुणतार्यपुत्रस्य ततः शोभनं भवति ।

॥ पत्रं १८ ॥

देवी । अहो अविनय आर्यपुत्रस्य ।
विदूषकः । भो धीरं गच्छ । तत्रभवती धारिणी विसंवादयिष्यति ।

॥ पत्रं २० ॥

विदूषकः । उपस्थितं नयनमधु संनिहितमाक्षिकं च । तदप्रमत्त इदानीं प्रेक्षस्व ।
विदूषकः । प्रेक्षतां भवान् । न खल्वस्याः प्रतिच्छन्दादपि हीयते मधुरता ।
मालविका ।

दुर्लभः प्रियस्तस्मिन्भव हृदय निराशमहहापाङ्गो मे स्फुरति किमपि वामकः ।
एष स चिरदृष्टः कथमुपनेतव्यो नाथ मां पराधीनां त्वयि गणय सतृष्णां ॥

विदूषकः । भो वयस्य चतुष्पदवस्तुकं द्वारीकृत्य त्वय्युपस्थापित इवात्मात्रभवत्याः ।

॥ पत्रं २१ ॥

विदूषकः । भवति तिष्ठ । किमपि वो विस्मृतः कर्मभेदः । तं तावत्प्रक्ष्यामि ।
देवी । ननु गौतमवचनमप्यार्यो हृदये करोति ।
विदूषकः । कौशिकीं तावत्पृच्छ । पश्चाद्यो मया कर्मभेदो दृष्टस्तं भणिष्यामि ।

॥ पत्रं २२ ॥

देवी । दिष्ट्या परीक्षाराधनेनार्यो वर्धते ।

विदूषकः । प्रथमोपदेशदर्शने प्रथमं ब्राह्मणपूजा कर्तव्या । सा ननु वो विस्मृता ।

॥ पत्रं २३ ॥

विदूषकः । यथा नाम शुष्कघनगर्जिते ऽन्तरीक्षे जलपानेन चातकायितं ।

विदूषकः । तेन हि पण्डितपरितोषप्रत्यया ननु मूढा जातिः । यदत्रभवत्या शोभनं भणितं तत इदमस्यै पारितोषिकं प्रयच्छामि ।

देवी । तिष्ठ गुणान्तरमज्ञानन्किं निमित्तं त्वमाभरणं ददासि ।

विदूषकः । परकार्यमिति कृत्वा ।

देवी । आर्य गणदास ननु दर्शितोपदेशा ते शिष्या ।

विदूषकः । एतावान्मे मतिविभवो भवन्तं सेवितुं ।

विदूषकः । साधु दरिद्रातुर इव वैद्येनौषधमुत्पाद्यमानमिच्छसि ।

॥ पत्रं २४ ॥

विदूषकः । अपिहा । अस्माकं भोजनवेला । अत्रभवत उचितवेलातिक्रमेण चिकित्सका दोषमुदाहरन्ति । हरदत्त किं भणसि ।

देवी । निर्वर्तयत्वार्यपुत्रो मध्याह्नविधिं ।

विदूषकः । भवती विशेषेण पानभोजनं त्वरयतु ।

विदूषकः । भो न केवलं रूपे शिल्पे ऽप्यद्वितीया मालविका ।

विदूषकः । भवताप्यहं । दृढं विपणिकन्दुरिव मे हृदयाभ्यन्तरं दह्यते ।

॥ पत्रं २५ ॥

विदूषकः । गृहीतदक्षिणो ऽस्मि । किं तु मेघावलीरुद्धज्योत्स्नेव पराधीनदर्शना तत्रभवती मालविका । भवानपि शूनापरिचर इव गृध्र आमिषलोलुपो भीरुकश्च । अत्यन्तातुर इव कार्यसिद्धिं प्रार्थयन्मे रोचसे ।

॥ पत्रं २६ ॥

समाहितिका । आज्ञप्तास्मि भगवत्या । समाहितिके देवस्योपवनस्थं बीजपूरकं गृहीत्वागच्छेति । तन्नावत्प्रमदवनपालिकां मधुकरिकामन्विच्छामि । एषा तपनीयाशोकमवलोकयन्ती मधुकरिका तिष्ठति । यावदेनां संभावयामि ।

समाहितिका । आलि सुखो त उद्यानवनव्यापारः ।

मधुकरिका । अहह समाहितिका । सखि स्वागतं ते ।

समाहितिका । हला भगवत्याज्ञापयति । अरिक्तपाणिनास्माद्दृशजनेनात्रभवान्द्रष्टव्यः । तद्बीजपूरकेण शुश्रूषयितुमिच्छामीति ।

मधुकरिका । ननु संनिहितं बीजपूरकं । कथयान्योन्यसंघर्षितानां नाट्याचार्याणामुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसितः ।

समाहितिका । द्वावपि किलागमिनौ प्रयोगनिपुणौ च । किं तु शिष्यागुणविशेषेणोन्नमितो गणदासः ।

मधुकरिका । अथ मालविकागतं कौलीनं किं श्रूयते ।

समाहितिका । बाढं किल तस्यां साभिलाषो भर्ता । केवलं

॥ पत्रं २७ ॥

देव्या धारिण्याश्चित्तं रक्षन्नात्मनः प्रभुत्वं न दर्शयति । मालविकाप्येषु दिवसेष्वनुभूतामुक्तेव मालतीमाला म्लायमाना लक्ष्यते । अतो ऽपरं न जाने । विसृज मां ।

मधुकरिका । एतच्छाखावलम्बि बीजपूरकं गृहाण ।

समाहितिका । हला त्वमपीतः पेशलतरं साधुजनशुश्रूषया फलं प्राप्नुहि ।

मधुकरिका । सखि समं गच्छावः । अहमप्यस्य चिरायमाणकुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै निवेदयामि ।

समाहितिका । युज्यते ऽधिकारः खलु ते ।

विदूषकः । अलं भवतो धीरतामुज्झित्वा परिदेवितेन । दृष्टा मया

॥ पत्रं २८ ॥

मालविकायाः प्रियसखी बकुलावलिका श्राविता चार्थं यो भवता संदिष्टः ।

विदूषकः । विज्ञापय भट्टारकं । अनुगृहीतास्म्यनेन नियोगेन । किं तु सा तपस्विनी देव्याधिकतरं रक्ष्यमाणा रत्नितानामिव निधीनां सुखं समासादयितव्या । तथापि यतिष्यामीति ।

विदूषकः । ननु भणामि तस्मिन्साधनीये कार्ये कृतो मयोपाय इति । तत्पर्यवस्थापयत्वत्रभवानात्मकं ।

विदूषकः । अद्यैव प्रथमावतारसुभगानि रक्तकुरवकाण्युपायनं प्रेष्य नववसन्तावतारव्यपदेशेनेरावत्या निपुणिकामुखेनाचक्षितः । इच्छाम्यार्यपुत्रेण सह दोलाधिरोहणमनुभवितुमिति । भवतापि संप्रति ज्ञातं । तत्प्रमदवनमेव गच्छावः ।

विदूषकः । कथमिव ।

॥ पत्रं २९ ॥

विदूषकः । नार्हति भवानन्तःपुरस्थितां दक्षिणामेकपदे पृष्ठतः कर्तुं ।

विदूषकः । इत इतो भवान् ।

विदूषकः । नन्वेतत्प्रमदवनं पवनबलचलाभिः पल्लवांगुलीभिस्त्वरयतीव भवन्तं प्रवेष्टुं ।

विदूषकः । प्रविश निर्वृतिलाभाय ।

विदूषकः । अवधानेन दृष्टिं देहि । एतत्खलु भवन्तमिव लोभयितुकामया प्रमदवनलक्ष्म्या युवतिवेशलज्जावपितृकं कुसुमनेपथ्यं गृहीतं ।

॥ पत्रं ३० ॥

मालविका । अविज्ञातहृदयं भट्टारकमभिलषन्त्यात्मनो ऽपि तावल्लज्जामि । कुतो विभवः स्निग्धस्य सखीजनस्य वृत्तान्तमाचक्षितुं । न जाने ऽप्रतिकारगुरुकं वेदनं कियत्कालं मदनो मां नेष्यतीति । कुत्र नु प्रस्थितास्मि । आ संदिष्टास्मि देव्या । गौतमचापलाद्दोलापरिभ्रष्टायाः सरुजौ मम चरणौ । न शक्नोमि । त्वं तावत्तपनीयाशोकस्य दोहदं निवर्तयेति । यदि स पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति ततस्तुभ्यमभिलाषपूरयितृकं प्रसादं दापयिष्यामीति । यावन्नियोगभूमिं प्रथमं गता भवामि । तावदनुपदं मम चरणालंकारहस्तया बकुलावलिकयागन्तव्यं । तत्परिदेविष्ये तावद्विश्रब्धं मुहूर्तकं ।

विदूषकः । ही ही एतत्खलु सीधुपानोद्वेजितस्य मत्स्यपिण्डकोपनता ।

विदूषकः । एषा नातिपरिष्कृतवेशोत्सुकवदनैकाकिनी मालविकादूरे वर्तते ।

॥ पत्रं ३१ ॥

विदूषकः । अथ किं ।

विदूषकः । एषा तद्द्वाग्निमध्यान्निष्क्रान्तेत एव परिवर्तमाना दृश्यते ।

विदूषकः । एषापि भवानिव मदनव्याधिना परिमृष्टा भविष्यति ।

मालविका । अशोको ललितसुकुमारदोहदापेक्षगृहीतकुसुमनेपथ्य उत्कण्ठिताया मम शोकमनुकरोति । यावदस्य प्रच्छायशीतले शिलापट्टके निसन्नात्मानं विनोदयामि ।

विदूषकः । श्रुतं भवतोत्कण्ठितास्मीत्यत्रभवती मन्त्रयते ।

॥ पत्रं ३२ ॥

विदूषकः । इरावतीमिवादूरे प्रेक्षे ।

मालविका । हृदय निरवलम्बनादतिभूमिलङ्घिनो मनोरथाद्विरम । किं मामायासयः ।

विदूषकः । सांप्रतं भवतः निःशंसयं भविष्यति । एषार्पितमदनसंदेशा विविक्ते ननु बकुलावलिकोपगता ।

विदूषकः । किमिदानीमेषा दास्या दुहिता तावद्गुरुकं संदेशं विस्मरति ।

बकुलावलिका । अपि सुखं सख्यै ।

मालविका । अहह बकुलावलिकोपस्थिता । स्वागतं ते । उपविश ।

॥ पत्रं ३३ ॥

बकुलावलिका । हला त्वमिदानीं योग्यतया नियुक्ता । एकं ते चरणमुपनय यावत्सालक्तकं सनूपुरं करोमि ।

मालविका । हृदय अलं सुखितया । उपस्थितोऽयं विभवः । कथमिदानीमात्मानं मुञ्चेयं । अथ वैतदेव मे मित्रमण्डनं भविष्यति ।

बकुलावलिका । किं विचारयसि । उत्सुका खल्वस्य तपनीयाशोकस्य कुसुमोद्गमे देवी ।

विदूषकः । किं खलु न जानासि । अकारणाद्देवीमामन्तःपुरनेपथ्येन योजयिष्यतीति ।

मालविका । हला मर्षयेदानीं ।

बकुलावलिका । अयि शरीरमसि मे ।

विदूषकः । चरणानुरूपस्तत्रभवत्या अधिकार उपक्षिप्तः ।

॥ पत्रं ३४ ॥

विदूषकः । पारयिष्यसि तत्रभवत्यामपराद्धुं ।

इरावती । कन्ये निपुणिके शृणोमि बहुशो मदो किल स्त्रीजनस्य विशेषमण्डनमिति । अपि सत्यो लोकवादोऽयं ।

निपुणिका । प्रथमं लोकवाद एव सत्यसत्यः संवृत्तः ।

इरावती । सविनिवेशसिना स्नेहनालं । कथय कुत इदानीमवगमितं दोलागृहं प्रथमागतो भर्ता न वेति ।

निपुणिका । भट्टिन्या अखण्डितात्प्रणयात् ।

इरावती । अलं सेवया । मध्यपदं गत्वा भण ।

निपुणिका । ननु वसन्तस्य . . वायनलोलुपेनार्यगौतमेन कथितं । त्वरतां भट्टिनी ।

इरावती । कन्ये मदेन ग्लायमानमात्मानमार्यपुत्रस्य दर्शने हृदयं त्वरयति चरणौ पुनर्मार्गे ऽव लगतः ।

निपुणिका । ननु संप्राप्ते स्वो दोलागृहकं ।

इरावती । निपुणिके आर्यपुत्र अत्र न दृश्यते ।

निपुणिका । ननु भट्टिन्यवलोकयतु । परिहासनिमित्तं कुत्रापि गूढेन भर्त्रा भवितव्यं । आवामपीमं प्रियंगुलतापरिक्षिप्तमशोकशिलापट्टकं प्रविशावः ।

इरावती । तथा ।

निपुणिका । अवलोकतां भट्टिणी चूतांकुरं विनमन्त्योरावयोः पिपीलिकाभिर्दर्शितं ।

॥ पत्रं ३५ ॥

इरावती । किमिवैतत् ।

निपुणिका । एषाशोकपादपच्छायाया मालविकाया बकुलावलिका चरणालंकारं निवर्तयति ।

इरावती । अभूमिरियं मालविकायाः । कथमत्र तर्कयसि ।

निपुणिका । तर्कयामि दोलापरिभ्रष्टसरुत्तचरणाया देव्याशोकदोहदाधिकारे मालविका नियुक्तेति । अन्यथा कथं देवी स्वयंधारितमेतन्नूपुरयुगलं परिजनस्याभ्यनुज्ञास्यति ।

इरावती । महती मे संभावना ।

निपुणिका । किं नान्विष्यते भर्ता ।

इरावती । कन्ये मे चरणावग्रतो न प्रपततः । मदो मां विकारयति । आशङ्कितस्य तावदन्तं गमिष्यामि ।

मालविका । स्थाने खलु कातरं मे हृदयं ।

बकुलावलिका । किमपि रोचते ते रागरेखाविन्यासः ।

मालविका । आत्मनश्चरणामिति लज्जाम्येतत्प्रशंसितुं । केन शिल्पसाधनकलायामेवमभिनीतासि ।

बकुलावलिका । अत्र खलु भर्तुः शिष्यास्मि ।

विदूषकः । त्वरस्वेदानीं गुरुदक्षिणायै ।

मालविका । दिष्ट्या न गर्वितासि ।

बकुलावलिका । उपदेशानुरूपे चरणे लब्ध्वेदानीं गर्विता भविष्यामि । हन्त सिद्धो मे दर्पः । सखि एकस्य ते चरणास्यावसितो रागनिक्षेपः । केवलं मुखमारुतो

॥ पत्रं ३६ ॥

लब्धव्यः । अथ वा प्रवातमेवैतत्स्थानं ।

विदूषकः । कुतस्ते ऽनुशयः । एतद्भवता चिरक्रमेणानुभवितव्यं ।

बकुलावलिका । सखि अरुणं शतपत्रमिव शोभते ते चरणं । सर्वथा भर्तुरङ्कपरिवर्तिनी भव ।

मालविका । हला माविनीतं मन्त्रयस्व ।

बकुलावलिका । मन्त्रयितव्यमेव मया मन्त्रितं ।

मालविका । प्रिया खल्वहं तव ।

बकुलावलिका । न केवलं मम ।

मालविका । कस्य वान्यस्य ।

बकुलावलिका । गुणेष्वभिनिवेशिनो भर्तुरपि ।

मालविका । अलीकं मन्त्रयसे । एतदेव मयि नास्ति ।

बकुलावलिका । सर्वं त्वयि नास्ति । भर्तुः कृशेषु सुन्दरपाण्डुरेषु दृश्यते ऽङ्गेषु ।

निपुणिका । प्रथमं गुणितमिव हताशाया उत्तरं ।

बकुलावलिका । अनुरागो ऽनुरागेण परीक्षितव्य इति सुजनवचनं प्रमाणं कुरु ।

मालविका । किमात्मनो छन्देन मन्त्रयसे ।

॥ पत्रं ३७ ॥

बकुलावलिका । न हि न हि । भर्तुः खल्वेतानि प्रणयमृदुकान्यक्षराणि विप्रप्रेरितानि ।

मालविका । हला देवीं चिन्तयित्वा न मे हृदयं विश्वसिति ।

बकुलावलिका । मुग्धे भ्रमरसंपातो वसन्तोदारसंभूत इदानीं नवचूतप्रसवो ऽवतंसनीयः ।

मालविका । त्वं यावन्मे दुर्ज्ञाते ऽवतंसिनी भव ।

बकुलावलिका । विमर्दसुरभी बकुलावलिका खल्वहं ।

इरावती । कन्ये प्रेक्षस्व कारितमेव बकुलावलिकयैतत्पदं मालविकायाः ।

निपुणिका । भट्टिनि निर्विकारस्याधिकारस्योचितोपदेशः ।

इरावती । स्थाने खलु शङ्कितं मे हृदयं । गृहीतार्थानन्तरं चिन्तयिष्यामि ।

बकुलावलिका । एषो ऽपि ते संवृत्तपरिकर्मा चरणः । यावदेनं सनूपुरं करोमि । हला उत्तिष्ठा नुतिष्ठ देव्या अशोकस्य विकाशयितृकं नियोगं ।

इरावती । श्रुतो देव्या नियोग इति । भवत्विदानीं ।

बकुलावलिका । एष उपारूढराग उपभोगक्षमः पुरतस्ते तिष्ठति ।

॥ पत्रं ३८ ॥

मालविका । किं भर्ता ।

बकुलावलिका । न तावद्भर्ता । अशोकशाखावलम्बी गुच्छकः । अवतंसय तावदेनं ।

विदूषकः । किं श्रुतं भवता ।

मालविका । अपि नामावयोः संभावना सफला भवेत् ।

बकुलावलिका । हला नास्ति ते दोषः । निःशंसयं निर्गुणो ऽयमशोको यदि कुसुमोद्गममन्थरो भवेयस्ते चरणसत्कारमलभत ।

॥ पत्रं ३९ ॥

विदूषकः । एतेनां परिहासयिष्यामि ।

निपुणिका । भट्टिनि भट्टिनि भर्तात्र प्रविशति ।

इरावती । एतन्मम प्रथमं चिन्तितं हृदयेन ।

विदूषकः । भवति युक्तं नामात्रभवतः प्रियवयस्यो ऽशोको वामपादेन ताडयितुं ।

उभे । अहह भर्ता । जयतु जयतु भर्ता ।

विदूषकः । बकुलावलिके गृहीतार्थया त्वयात्रभवतीदृशमविनयं कुर्वन्ती कस्य [किं] न निवारिता ।

निपुणिका । भट्टिणि प्रेक्षस्व किं प्रवृत्तमार्यगौतमेन ।

इरावती । कथं खलु ब्राह्मबन्धुरन्यथा जीविष्यति ।

बकुलावलिका । आर्य एषा देव्या नियोगमनुतिष्ठति । एतस्मिन्नतिक्रमे परवतीयं । प्रसीदतु भर्ता ।

विदूषकः । युज्यते देव्यत्र मानयितव्या ।

इरावती । अहो नवनीतकल्पहृदय आर्यपुत्रः ।

॥ पत्रं ४० ॥

मालविका । बकुलावलिके एकानुष्ठितमात्मनो नियोगं देव्यै निवेदयावः ।

बकुलावलिका । विज्ञापय भर्तारं विसृजेति ।

बकुलावलिका । अवहिता शृणु । आज्ञापयतु भर्ता ।

इरावती । पूरय पूरय । अशोकः कुसुमं न दर्शयति । अयं खलु पुनरुत्तम्भित एव ।

विदूषकः । किमन्यज्जङ्घाबलमेव ।

इरावती । साधु बकुलावलिके साधूपक्रान्तमिदानीं । कुरु सफलप्रार्थनमार्यपुत्रं ।

उभे । प्रसीदतु भट्टिनी । के आवां भर्तुः प्रणायपरिग्रहस्य ।

इरावती । अविश्वसनीयाः पुरुषाः । आत्मनो वञ्चकवचनं प्रमाणीकृत्याधिक्षिप्तायाः प्रियगृहिण्या हृदयशल्यं कृतं । एवं न विज्ञातं मया व्याधजनगृहीतचित्ताया अविशङ्किताया हरिण्या इव विनाश इति ।

विदूषकः । भोः प्रतिपद्यस्व किमप्युत्तरं । किं न भणसि । उदकान्तमूले विमहिले विमथितेन कुम्भीलेन संदेशो

॥ पत्रं ४१ ॥

रक्षितव्य इति । वार्ताघ्नो भव ।

इरावती । अविश्वसनीयको ऽसि । न मया विज्ञातमीदृशो विनोदवृत्तान्त आर्यपुत्रेणोपलब्ध इति । अन्यथा दुःखव्यापारिण्येवं न करोमि ।

विदूषकः । मा तावत्तत्रभवतो दाक्षिण्यस्योपरोधं भवितुं समीपदृष्टेन देव्याः परिक्षीणेन संकथाभिसूचितापराधः क्षम्यतां । अत्र त्वमेव प्रमाणं ।

इरावती । ननु संकथा नाम भवतु किमित्यात्मानमायासयिष्यामि ।

इरावती । शठ अविश्वसनीयो ऽसि ।

इरावती । इयमपि हताशा त्वामेवानुसरति ।

॥ पत्रं ४२ ॥

इरावती । किमेवं भूयो ऽपि मामवधीरितां करोति ।

इरावती । न खल्विमौ मालविकायाश्चरणौ यौ ते हर्षदोहदं पूरयिष्यतः ।

विदूषकः । उत्तिष्ठाकृतप्रसादो ऽसि ।

॥ पत्रं ४३ ॥

प्रतीहारी । जयतु जयतु भर्ता । असंनिहितो गौतमः ।

विदूषकः । जयतु जयतु भवान् ।

प्रतीहारी । यद्देव आज्ञापयति ।

विदूषकः । यो विडालगृहीतायाः परभृतिकायाः ।

॥ पत्रं ४४ ॥

विदूषकः । सा खलु तपस्विनी तया पिङ्गलाक्ष्या सारभाण्डगृहके मुखे परिक्षिप्ता ।

विदूषकः । अथ किं ।

विदूषकः । शृणोतु भवान् । परिव्राजिका मे कथयति । भो ह्यः किल तत्रभवतीरावती रुजाय मानचरणां देवीं सुखं प्रष्टुमागता ।

विदूषकः । ततः सा देव्या पृष्टा । किमात्मनो ऽप्यनलंकृतो क्षो जनो वल्लभ इति । ततस्तयो ह्याम्यन्त्या मन्त्रितं । कुतो वोपचारो यत्परिजने संक्रान्तं वल्लभत्वं ज्ञास्यतीति ।

विदूषकः । ततस्तयानुबध्यमानया भवतो ऽविनयमन्तरेण परिगतार्था कृता ।

विदूषकः । किमपरं । मालविका बकुलावलिका च निगडपदावदृष्टसूर्यपादे पातालवासं नागक न्यके इवानुभवतः ।

॥ पत्रं ४५ ॥

विदूषकः । कथं भविष्यति । यत्सारभाण्डव्यापारिता माधविका देव्या संदिष्टा । ममांगुलीयमुद्रका मदृष्ट्वा न मोक्तव्या त्वया हताशा मालविका बकुलावलिका चेति ।

विदूषकः । अस्त्यत्रोपायः ।

विदूषकः । को ऽप्यदृष्टः शृणोति । कर्णे ते कथयामि । एवमिव ।

प्रतीहारी । देव प्रवातशयने देवी निसन्ना रक्तचन्दनवारिणा परिजनहस्तगतेन चन्दनेन भगवत्या विनोद्यमाना कथाभिस्तिष्ठति ।

विदूषकः । भो गच्छतु भवान् । अहमपि देवीमरिक्तपाणिर्भविष्यामि ।

विदूषकः । तथा । एवमिव भवति ।

प्रतीहारी । इत इतो देवः ।

देवी । भगवति रमणीया कथा । ततस्ततः ।

॥ पत्रं ४६ ॥

देवी । अहह भर्ता ।

धारिणी । जयतु जयत्वार्यपुत्रः ।

धारिणी । अस्ति मे विशेषः ।

विदूषकः । परित्रायतां परित्रायतां भवान् । सर्पेणास्मि दष्टः ।

विदूषकः । देवीं द्रक्ष्यामीत्याचारपुष्पकारणात्प्रमदवनं गतो ऽस्मि ।

धारिणी । हा धिग्हा धिगहमेव जीवितसंशयनिमित्तं जाता ।

विदूषकः । तस्मिन्नशोकस्यपुष्पकारणात्प्रसारितो दक्षिणाहस्तः । ततः कोटरविनिर्गतेन सर्पच्छपिणा कालेन दंशितो ऽस्मि । नन्वेते द्वे पदे ।

॥ पत्रं ४७ ॥

प्रतीहारी । यद्देव आज्ञापयति ।

विदूषकः । अहो पापेन मृत्युना गृहीतो ऽस्मि ।

विदूषकः । कथं न भेष्यामि । सेस्मीयन्ते मे ऽङ्गानि ।

धारिणी । हा हा दंष्ट्रितं विचारेणावलम्बध्वमेनं ।

विदूषकः । भो बालप्रियवयस्यो ऽस्मि ते । अविकारेणापुत्रायै जनन्यै योगक्षेमं वह ।

जयसेना । आज्ञप्तो ध्रुवसिद्धिर्विज्ञापयति । इहैव गौतम आनीयतामिति ।

जयसेना । तथा ।

